मुत्तीर्णात्विषमन्तरेव कतिचित् चित्काकणीमूचिरे।
अन्ये केचन यामलामृतसरित्संभेदसंभोगिनो
मातस्त्वामपृथक्प्ररोहमुभयोरौचित्यमाचक्षते ।। इति।

तथा च सति विश्वस्योन्मेषलक्षणायामवस्थायामन्तश्चिच्छक्तिनिमेषापर-

पर्यायायां यावान् प्रसरः षडध्वोल्लासप्रथासतत्त्वो भवति, तथा विश्वस्य निमेषे स्वात्मान्तःक्रोडीकारैकपारिशेष्ये सत्यपि तावानुन्मेषदशासमस्वभावो भवति। न तर्हि विश्वनिमेष इति चेत्? स्वैरं निमेष एव। अपि तु कललावस्थयाऽवस्थितिरिति ब्रूमः। यथा शिखण्ड्यण्डे सर्वशिखण्ड्यवयवानुप्रविष्टबर्हपरिबर्हादिवर्णरेखा-वैचित्र्यशिल्पकल्पनाकौशलमखिलमप्यत्यन्तसूक्ष्मेक्षिकयाऽवधार्यमस्तीत्यङ्गी-क्रियते, एवमत्रापि। यदुक्तं श्रीत्रिंशिकाशास्त्रे—

यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः।
तथा हृदयबीजस्थं जगदेतच्चराचरम्।। इति।

कललता नामावस्थायाः सर्वाकारमविभक्तं रूपम्। यदि च तद् विश्ववैचित्र्यं निमेषदशायां कललावस्थायामपि न स्यात्, तर्ह्युन्मेषदशैव न स्यात्, प्राक् सत एवोत्पत्त्यौचित्यात्। तथा हि विश्वोन्मेषावस्थायामात्मरूपस्य केवलं तिरोधान-मात्रम्, न पुनरत्यन्तोपप्लवः। एवमन्यत्रापीति। एतदर्थपरामर्शपरिहाण्या पाशव-वेदान्तस्य पर्युदासः। तत्र ह्यद्वैतमाग्रहेणोपपाद्यमानमपि द्वैतकक्ष्यामेवाधिरोहति। यदत्र सत्यासत्यव्यवस्थया हेयोपादेयकल्पनायां तेनैवाकारेण द्वैतमर्यादापर्य-वसायित्वमनिवार्यम्। तदुक्तं मयैव संविदुल्लासे—

द्वैतादन्यदसत्यकल्पमपरैरद्वैतमाख्यायते
तद् द्वैते बत पर्यवस्यति कृतं वाचाटदुर्विद्यया।
एते ते वयेवमभ्युदयिनोः कस्यापि कस्याश्चिद-
प्यालस्योज्झितमैकरस्यमुभयोरद्वैतमाचक्ष्महे ।। इति।

अद्वैतगर्वो महतः प्रमातुः को नाम मिथ्या भवति प्रपञ्चे।
स्वयंवरे ते परिपन्थिवर्गे किं तज्जिगीषोरसहायशौर्यम्।। इति च।

शिव की व्यापकता एवं अध्व-प्रसर—ग्रन्थकार का कथन है कि परमात्मा शिव का विश्व की उन्मेषावस्था में जितना अध्वप्रसर (अध्व-प्रसार) है, उतना ही विश्व की निमेषावस्था में भी है अर्थात् उतना ही प्रसार (विस्तार) समस्त तत्त्वों के आत्म-स्वरूप में लयीभूत होने की अवस्था में (कललावस्था में सर्वाकारमय; किन्तु अविभक्ता-वस्था में मयूराण्डरसवत्) भी है, जितना कि उन्मेषावस्था में।

विश्व के उन्मेष-निमेष दोनों में ही परमात्मा के प्रसार हैं। अनन्त चित् शक्ति का ही उन्मेष एवं निमेष में प्रसार होता है। कललावस्था क्या है? यह जीव की जन्मपूर्व की गर्भस्थित अविभक्त सर्वाकाररूप में स्थिति है।

उन्मेष (विश्व-वैचित्र्य-विलास) एवं निमेष (कूर्म द्वारा अपने अंगों को अपने शरीर के भीतर समेट लेने की क्रिया की भाँति) शक्ति का विश्व को स्वान्तःकृत (कवलीकृत)

कर लेने की क्रिया—दोनों में शक्ति का प्रसार है। यदि निमेष (प्रलयकाल में विश्व की शक्ति की कुक्षि में विद्यमानता) न हो तो उन्मेष (सृजन-काल में प्रतिसंहृत विश्व की बाह्याभिव्यक्ति) कैसे सम्भव होगा? यथार्थत: उन्मेष ही निमेष है और निमेष ही उन्मेष है। उन्मेष जगत् की बाह्याभिव्यक्तावस्था है तो निमेष उसकी अनभिव्यक्त शक्ति में प्रतिसंहृत अविभक्त एवं कारण में प्रलीन प्रलयकालिक अवस्था है। उन्मेष एवं निमेष—दोनों एक ही सत्ता के दो पक्ष हैं।

त्रिंशिकाशास्त्रकार की दृष्टि—त्रिंशिकाशास्त्र में कहा गया है कि जिस प्रकार वट के बीज में अत्यन्त विशाल वृक्ष अन्तर्निहित रहता है, उसी प्रकार हृदयबीज में चराचर जगत् तिरोहित रहकर विद्यमान रहता है—

यथा न्यग्रोधबीजस्थ: शक्तिरूपो महाद्रुम:।
तथा हृदयबीजस्थं जगदेतच्चराचरम्।।

सारे सांसारिक पदार्थ, चराचर जगत् एवं माता-मेय-मान के रूप में स्थित त्रिपुटी परमेश्वर के अंग ही तो हैं—स्वाङ्गरूपेषु भावेषु।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि—

१. भगवान् शिव का एक रूप विश्वगुरु (देशिक) का भी है—देशिकनाथस्य यावान् प्रसर:। यह स्वरूप विश्वानुग्राहक स्वरूप है—देशिकतया सर्वानुग्राहकतया (परिमल)।

२. इस देशिकनाथ (गुरुओं के भी गुरु = परम स्वामी, परम गुरु) परमेश्वर शिव की उन्मेष-निमेष यौगपद्यलक्षणा एक अनिर्वचनीय (अवाङ्मनसगोचर परा भट्टारिका) पराशक्ति भी है—देशिकतया सर्वानुग्राहकतया नाथ्यमानस्य परमेश्वरस्य सा काचिदुन्मेष-यौगपद्यलक्षणा शक्तिरस्ति।[१]

इस उन्मेष-निमेष का स्वरूप क्या है? स्वरूपोन्मेष में ही विश्वनिमेष भी है और विश्वोन्मेष में स्वरूपनिमेष भी है। ये दोनों तुलाधृतवत् यौगपद्य के साथ स्थित हैं। इसी कारण परमेश्वर के दो स्वरूप हैं—विश्वात्मक एवं विश्वोत्तीर्ण (ततश्च विश्वात्मको विश्वोत्तीर्णश्च परमेश्वर:—परिमल)।

३. उन्मेष एवं निमेष दोनों अन्योन्यसापेक्ष हैं। अत: समप्रधान हैं।[२]

परास्तोत्र में व्यक्त दृष्टि—परास्तोत्र में कहा गया है—

एके भूज-लखानिलानलकलारब्धां बहि:प्रक्रिया-
मुत्तीर्णत्विषमन्तरेव कतिचित् चित्काकणीमूचिरे।
अन्ये केचन यामलामृतसरित्संभेदसंभोगिनी
मातस्त्वामपृथक्प्ररोहमुभयोरौचित्यमाचक्षते ।।

१-२. परिमल

विश्वोन्मेषलक्षणा अवस्था में अन्तःस्थित चित् शक्ति निमेष नामक अपर पर्याय (अन्य संज्ञा) की अवस्था में भी उतनी ही व्यापकता रखती है (अर्थात् उतनी ही षडध्वोल्लास प्रथा रहती है), जितनी कि उन्मेष दशा में। विश्व-निमेष की अवस्था में विश्व स्वात्मान्तःक्रोडीकृत होते हुये भी उन्मेष उन्मेषदशास्वभाव वाला ही रहता है—विश्वस्य निमेषे स्वात्मान्तःक्रोडीकारैकपारिशेष्ये सत्यपि नावानुन्मेषदशासमस्वभावो भवति।[१]

अन्तर केवल यह रहता है कि विश्व इस निमेषदशा में कललावस्था में रहता है। विश्व की (शक्ति के गर्भ में स्थित) कललावस्था मयूराण्डरसवत् समस्त अंगों से परिपूर्ण होते हुये भी अविभक्ताङ्ग, अस्फुट एवं अदृश्यशरीरा रहती है। त्रिंशिकाशास्त्र में इसी स्थिति को 'यथा न्यग्रोधबीजस्थः ..... चराचरम्।'

द्वारा प्रदर्शित किया गया है।

कललावस्था क्या है? कलला नामावस्थायाः सर्वाकारमविभक्तं रूपम्।

यदि ये आकार निमेषावस्था में न रहते (कललावस्था में न रहते) तो उन्मेष दशा में भी इनकी विद्यमानता सम्भव न होती।[२]

विश्वोन्मेषावस्था—तथा हि विश्वोन्मेषावस्थायामात्मरूपस्य केवलं तिरोधानमात्रम् न पुनरत्यन्तोपप्लवः।

निमेषावस्था—एवमन्यत्रापीति अर्थात् यही स्थिति निमेषावस्था की भी है।

वेदान्त का खण्डन—आचार्य महेशानन्द की दृष्टि में इस प्रसंग में उपपादित सिद्धान्त असंगत एवं अनौचित्यपूर्ण है—एतदर्थपरामर्शपरिहाण्या पाशववेदान्तस्य पर्युदासः।[३]

उक्त परामर्श के परिहाण (ह्रास) के कारण पाशव दृष्टि रखने वाले वेदान्त दर्शन ने शैव-शाक्त दर्शन के इस सिद्धान्त का निषेध (पर्युदास) किया है। वेदान्त में अद्वैत के प्रति आग्रह होने पर भी वेदान्त द्वैतवादी बन गया है—तत्र ह्यद्वैतमाग्रहेणोपपाद्यमानमपि द्वैतकक्ष्यामेवाधिरोहति।

अद्वैतवादियों के सिद्धान्त में उनके सिद्धान्त के विपरीत, सत्यासत्य व्यवस्था के कारण हेयोपादेय कल्पना में द्वैतमर्यादा के अपर्यवसायित्व (अनिश्चय) की स्थिति बनी हुई है; अतः द्वैत का पर्यवसान (अन्त/समाप्ति) नहीं है—

१. एतदर्थपरामर्शपरिहाण्या पाशववेदान्तस्य पर्युदासः।

२. तत्र ह्यद्वैतमाग्रहेणोपपाद्यमानमपि द्वैतकक्ष्यामेवाधिरोहति।

३. यदत्र सत्यासत्यव्यवस्थाया हेयोपादेयकल्पनायां तेनैवाकारेण द्वैतमर्यादापर्यवसायित्वमनिवार्यम्।[४]

१-३. परिमल ४. परिमल (३०)

संविदुल्लासकार की दृष्टि—

द्वैतादन्यदसत्यकल्पमपरैरद्वैतमाख्यायते ।
तद् द्वैते बत पर्यवस्यति कृतं वाचाटदुर्विद्यया।
एते ते वयमेवमभ्युदयिनोः कस्यापि कस्याश्चिद-
प्यालस्योज्झितमैकरस्यमुभयोरद्वैतमाचक्ष्महे ।।

अतः अद्वैत का मिथ्या गर्व व्यर्थ है—

अद्वैतगर्वो महतः प्रमातुः को नाम मिथ्या भवति प्रपञ्चे।
स्वयंवरे ते परिपन्थिवर्गे किं तज्जिगीषोरसहायशौर्यम्।।

निष्कर्ष—महेश्वरानन्द जी कहते हैं कि निष्कर्ष यह है कि उन्मेष ही निमेष है और निमेष ही उन्मेष है—ननून्मेष एव निमेषो निमेष एवोन्मेषो विश्वस्य विश्वोत्तीर्णस्य चेति।[१]

सर्वानुग्रहकारी परमशिव विश्व की उन्मेषावस्था में जितना भी प्रसर (अध्वपर्यन्त विस्तार) है, उतना ही विश्व के निमेष में समस्त तत्त्वों के आत्मस्वरूप लय में कलालावस्था—सर्वाकारमय अविभक्त अवस्था में अध्वपर्यन्त विस्तार या प्रसर है।

विश्वोन्मेष-निमेष—दोनों में ही परमात्मा का प्रसरस्वभाव कार्यप्रवृत्त हैं। अनन्त चिच्छक्ति का ही उन्मेष-निमेष में प्रसार होता है। कललावस्था का अभिप्राय है—अविभक्त सर्वाकाररूप स्थिति। यदि विश्ववैचित्र्य विलास निमेष-दशा में नहीं है तो उन्मेषदशा होती ही नहीं। वास्तव में उन्मेष ही निमेष है और निमेष ही उन्मेष है।

श्रीत्रिंशिकाकार की दृष्टि—त्रिंशिका में कहा गया है—

यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः।
तथा हृदयबीजस्थं जगदेतच्चराचरम्।।

जिस प्रकार वटवृक्ष के बीज में अत्यन्त शक्तिशाली विशाल वृक्ष अन्तर्निहित रहता है, उसी भाँति हृदयबीज में चराचर जगत् अन्तर्हित (तिरोहित) रहता है।

ज्ञानकला एवं उसके द्वारा लोकत्रय की अभिव्यक्ति

ननून्मेष एव निमेषो निमेष एवोन्मेषो विश्वस्य विश्वोत्तीर्णस्य चेति महत्येषा व्याहतिरित्याशङ्क्याह—

तिउडिमअं खु समत्थं तत्थ अ णेअम्मि णाउए अ समं।
दिढगण्ठी णाणकला कलेइ तेल्लोक्कमेक्कल्लं ।।३१।।

---

१. परिमल (३०)

(त्रिपुटीमयं खलु समस्तं तत्र च ज्ञेये ज्ञातरि च समम्।
दृढग्रन्थिर्ज्ञानकला कलयति त्रैलोक्यमेकलम्।।)

परमेश्वर की सुदृढ़ ग्रन्थि वाली ज्ञान कलारूपा चित् शक्ति ज्ञाता-ज्ञान-ज्ञेय की त्रिपुटी के रूप में स्थित लोकत्रय को समान रूप में एक स्वरूप से अभिव्यक्त करती है।।३१।।

विश्वव्यवहारे वादिनां सर्वोऽपि वचनपरम्पराप्रपञ्चो ज्ञाता ज्ञानं ज्ञेयमित्येवंरूपपुटत्रयसमाहारात्मन्यर्थतत्त्वे पर्यवस्यति। यद् गुरुमतानुसारिणः स्पष्टतोत्कर्षादन्योन्यनिर्विशेषं साकल्येन प्रत्यक्षतयाचक्षते। पुटत्वं चैषामशेषविश्वक्रोडीकारसामर्थ्यात्। तत्र च त्रिपुट्यामन्तरालवर्तिनी या ज्ञानकला चिच्छक्तिः, सा खलु—

वेद्यमेतदखिलं स ईश्वरो वेदिता यदनयोः स्वलक्षणम्।
त्वामृते सुमुखि! वित्तिमन्तरा का नु तद् घटयितुं प्रगल्भते।।

इति श्रीकोमलवल्लीस्तवस्थित्या विषयतयावरोध्यं वेद्यवर्गं भोक्तृतया स्फुरन्तं वेदितारं च प्रति समं विशेषशङ्काशून्यं यथा भवति तथा दृढग्रन्थिः कोटिद्वयावगाहेन तादात्म्येनोपश्लेषाद् वज्रलेपवदप्रकम्प्यसम्बन्धा भवन्ती त्रैलोक्यमेकलमेकस्वभावं कलयति। स च स्वभावो वेद्यं वित्तिर्वेदितेति, स्थूलं सूक्ष्मं परमिति, जाग्रत् स्वप्नः सुषुप्तमित्यादिना त्रैविध्येनाप्युपपद्यते। दृढग्रन्थिरित्युक्तत्वात्। सम्बन्धं प्रत्यदार्ढ्यशङ्कायां हि एकमन्यस्माद् भिद्येत। तच्च न सम्भवतीति। त्रैलोक्यपदेन—

देवानां त्रितयं, त्रयी हुतभुजां, शक्तित्रयं, त्रिस्वरा-
स्त्रैलोक्यं, त्रिपदी, त्रिपुष्करमथ, त्रिब्रह्म, वर्णास्त्रयः।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत् सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः।।

इति श्रीलघुभट्टारकस्थित्या त्रिवर्गभूतमखिलमपि क्रोडीक्रियते। एवञ्च वेदितैव वेद्यं वेद्यमेव वेदिता वित्तिरेव वेद्यमित्याद्यशेषस्वभावसामरस्याभ्युपगमस्य पर्यन्ततः सिद्धान्तरहस्यत्वादुन्मेष एव निमेष इत्यादिव्याहतिदोषोद्भावनमस्मत्सञ्चारसरणीसीमसु न कञ्चिदपि कण्टकाङ्कुरमुन्मीलयितुमुद्युङ्क्त इति। तदुक्तं श्रीस्पन्दसन्दोहे—'एवमियमेकैवाविभागरूपा परामर्शभूमिरुन्मेषनिमेषमयी उन्मेषनिमेषशब्दाभ्यामभिधीयते' इति। एतेन विमर्शः सर्वंसह इत्युक्तं भवति। यदुक्तं श्रीप्रत्यभिज्ञाविमर्शिन्याम्—'विमर्शो हि सर्वंसह आत्मानमपि परीकरोति, परमप्यात्मीकरोति, द्वयमप्येकीकुरुते, उभयमपि न्यग्भावयति' इति। श्रीपरामते च—

परीकर्तुं निजं तत्त्वं स्वात्मीत्कर्तुं तयोभयम्।
एकीकर्तुं न किं कर्तुं विमर्शो जगति क्षमः।। इति।

समस्त जगत्-व्यवहार या विमर्श निःसन्देह एक ही ज्ञानशक्ति (चिच्छक्ति) के ज्ञाता एवं ज्ञेय के रूप में विराट् विस्तार है। यही शक्ति त्रिपुरा कही जाती है। विमर्श शक्ति अपने तत्त्व को भिन्न रूप में तथा अभिन्न स्वात्मरूप में प्रकट करने में समर्थ है। यह सर्वसमर्थ है। ज्ञाता, ज्ञेय एवं ज्ञानस्वरूप त्रिपुटी से त्रिपुटित विश्व का व्यवहार परमात्मा की निश्चयात्मिका परम स्वतन्त्र चिच्छक्ति से प्रभावित (या सक्रिय) विमर्शरूपात्मक है। परमेश्वर की सुदृढ़ एवं परम स्वतन्त्र ज्ञान कला (चित् शक्ति) ज्ञाता, ज्ञेय एवं ज्ञान में त्रिपुटित इस लोकत्रय के प्रापञ्चिक व्यवहार को समान रूप से तथा एक स्वभाव से अभिव्यक्त करती है।

निःशेष जागतिक व्यवहार एक ही ज्ञानशक्ति (चिच्छक्ति) का ज्ञाता एवं ज्ञेय के रूप में विस्तार है। ज्ञाता, ज्ञान एवं ज्ञेय की त्रिपुटी में यही चिच्छक्ति (ज्ञानकला) ही अवस्थित है। इसी रूपत्रय के कारण इसे त्रिपुरा भी कहा गया है। विमर्श (जागतिक या पारमात्मिक विमर्श) का मूल भी ज्ञानकलात्मिका चित् शक्ति है।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि विश्व के समस्त व्यवहारों (जागतिक क्रियाकलापों एवं प्रापञ्चिक विमर्शों) में समस्त बोलने वालों की वचनपरम्परा का अशेष विस्तार (क) ज्ञाता, (ख) ज्ञान एवं (ग) ज्ञेय के रूप में त्रिपुटित है अर्थात् ज्ञाता-ज्ञान-ज्ञेयसमाहारात्मक है। इसी ने समस्त विश्व को क्रोडीकृत करके रखा है।

ज्ञानकलारूपा चिच्छक्ति त्रिपुरान्तरालवर्तिनी है। कहा भी गया है—

वेद्यमेतदखिलं स ईश्वरो वेदिता यदनयोः स्वलक्षणम्।
त्वामृते सुमुखि! वित्तिमन्तरा का नु तद् घटयितुं प्रगल्भते।।
(कोमलवल्लीस्तव)

वेद्यवर्ग एवं वेदक दोनों में वही ज्ञानकला अवस्थित है। यह ज्ञानकला तो एक है, किन्तु वही प्रसृत होकर १. ज्ञाता, २. ज्ञान एवं ३. ज्ञेय के रूप में अभिव्यक्त होती है।

ज्ञानशक्ति ही त्रैलोक्य को एकस्वभाव बनाती है; क्योंकि सभी वही एक (ज्ञानशक्ति) ही तो है—त्रैलोक्यमेकस्वभावं कलयति।

यह स्वभाव १. वेद्य, २. वित्ति एवं ३. वेदिता के रूप में स्थित है। यही स्थूल, सूक्ष्म एवं पर रूप में भी अवस्थित है। यही जाग्रत्, स्वप्न एवं सुषुप्ति के रूप में भी अवस्थित है। इसी कारण यह दृढ़ग्रन्थि कहा गया है।

सारे पारस्परिक जागतिक व्यवहार भी इसी त्रिपुटी से त्रिपुटित हैं; अतः सब कुछ त्रितयात्मक है—

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथ त्रिब्रह्म वर्णास्त्रयः।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत् सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः।।[१]

समस्त विश्व इसी त्रिवर्ग में क्रोडीकृत है—त्रिवर्गभूतमखिलमपि क्रोडीक्रियते।[२]

वेदिता ही वेद्य है और वेद्य ही वेदिता है। वित्ति ही वेद्य है; अतः सभी में स्वभाव-सामरस्य है—वेदितैव वेद्यं, वेद्यमेव वेदिता, वित्तिरेव वेद्यम् इत्याद्यशेषस्वभावसामरस्याभ्युगमः।

इसी सिद्धान्त के आधार पर—उन्मेष एव निमेषः।

स्पन्दसन्दोहकार की दृष्टि—स्पन्दसन्दोह में भी इसी तथ्य की पुष्टि करते हुये कहा गया है कि—एवमियमेकैवाविभागरूपा परामर्शभूमिरुन्मेषनिमेषमयी उन्मेषनिमेषशब्दाभ्यामभिधीयते। इसलिये विमर्शशक्ति सर्वंसह है—एतेन विमर्शः सर्वंसह इत्युक्तं भवति।

प्रत्यभिज्ञाविमर्शिनीकार की दृष्टि—आचार्य अभिनवगुप्त करते हैं कि—विमर्शो हि सर्वंसह आत्मानमपि परीकरोति, परमप्यात्मीकरोति, द्वयमप्येकीकुरुते, उभयमपि न्यग्भावयति।

श्रीपरामतकार की दृष्टि—

परीकर्तुं निजं तत्त्वं स्वात्मीकर्तुं तथोभयम्।
एकीकर्तुं न किं कर्तुं विमर्शो जगति क्षमः।।

भावाभाव—दोनों में संवित् का प्रसार

ननु सर्वैकरसवादस्वीकारे कोऽयं सत्यासत्ययोर्भेद इत्याशङ्क्य न कश्चिदित्युदाहरणद्वारोपदर्शयति—

को सब्भावविसेसो कुसुमादो होइ गअणकुसुमस्स।
जं फुरणाणुप्पाणो लोओ फुरणं च सव्वसामण्णं ॥३२॥

(कः सद्भावविशेषः कुसुमाद् भवति गगनकुसुमस्य।
यत् स्फुरणानुप्राणो लोकः स्फुरणं च सर्वसामान्यम्।।)

(लोक-व्यवहार में प्रयुक्त) सामान्य पुष्प से आकाशपुष्प के स्वरूप में ऐसी कौन-सी विशिष्टता है, जिसके स्फुरण से सामान्य लोकव्यवहार अनुप्राणित होकर स्फुरित होता है? (वस्तुतः दोनों में कोई विशेष भेद नहीं है)।।३२।।

---

१. लघुभट्टारक २. परिमल

प्रसिद्धकुसुमाद् गगनकुसुमस्य सद्भावे को विशेषः। न कश्चिदिति वाक्योपसंहारः। यदिति हेतौ। लोको हि विश्वव्यवहारस्वभावः। संविदेव भगवती विषयसत्त्वोपगमे शरणमिति गुरुमतमर्यादया स्फुरणं प्रकाशमानत्वमेवानुप्राणनतया जीवभूततया परिगृह्य वर्तत इत्यसकृदवोचाम। तच्च स्फुरणं विप्रतिपन्ने खपुष्पे सम्प्रतिपन्ने चम्पकादौ च सामान्यमपक्षपातेन प्रसरति। यदि च तस्य तत्र पक्षपातेन प्रवृत्तिः, तत् खपुष्पमित्यपि न स्फुरेत्। अत एवोक्तमाचार्याभिनवगुप्तपादैः सा स्फुरत्ता महासत्तेत्यत्र महासत्तेत्येतत्पदव्याख्यानावसरे—'सा हि खपुष्पादिकमपि व्याप्नोति' इति। यथा श्रीशिवदृष्टौ—

शशशृङ्गादिकेनापि स्याद् विभक्त्या समन्वयः । इति।

पदसङ्गतौ च—'तस्मात् तत्रापि विभक्तियोगेन कारकत्वे सति सत्तैव शिवताख्या' इति। एतेन स्तम्भकुम्भादीनां भावानां प्रकाश एव सामान्यात्मनानुप्राणनः प्रवर्तते, न पुनः सामान्यं नाम पदार्थान्तरमित्युक्तं भवति। तत्र च विकल्परूपा व्यक्तयः। अविकल्पात्मा महाप्रकाशः सामान्यम्। ततश्चानुवृत्तिप्रत्ययनिमित्तं सामान्यमित्याचक्षाणा वैशेषिकादयः प्रत्याख्याताः, प्रकाशस्याहेतुकत्वात्। प्रत्युत विश्वविलासं प्रत्यस्यैव हेतुत्वात् सर्वसामान्यमिति। एतादृशस्य सामान्यस्य हि समवायविशेषाद्यविशेषेण विश्वमेव विषयो न पुनर्द्रव्यादिरवच्छिन्नः पदार्थ इत्यर्थः। अथ च प्रष्टव्योऽयमन्यपुष्पात् खपुष्पस्य विशेषः। तुच्छत्वमिति चेत्। किं तत् तुच्छत्वं नाम। न तावच्छून्यत्वम्। गगनस्य पुष्पस्य च पृथक् पृथक् सद्भावात्। अनयोरन्योन्यं कार्यकारणभावसम्बन्धाभावात् तद्द्वारा विशिष्टस्याप्यसत्त्वमिति चेत्? न। अन्योन्यत्वं नामानयोरेकैकपर्यालोचनायां न सम्भवति। सम्भवे चोक्तस्यैव दोषस्यानुषङ्गः। यदि च तन्मेलनांश इत्युच्यते, तर्ह्यसम्बन्धादित्यस्य व्याघातः स्यात्, मेलनस्याभ्युपगतत्वात्। मेलकश्चासौ प्रतीतो वा स्यान्न वा? नान्त्यः, व्यवहारानुपपत्तेः। ततश्च प्रतीतिपक्ष एवावशिष्यते। सा च प्रतीतिरनयोर्मेलनमुपस्थापयन्ती तुच्छत्वमेव तत् तुच्छीकर्तुमुद्यच्छतीति चम्पकपाटलादिप्रसूनप्रकियया व्योमकुसुमस्यापि व्यवहारकक्ष्यावैषम्याभावाद् यदसत् तत्र प्रतिभाप्ररोहासम्भवाद् मूकीभाव एव शरणं प्रतिवादिनो जनस्य। अत एव हि योगिनः केचिदाकाशादेरपि प्रसूनान्यानयन्तो दृश्यन्ते। न च तत्र स्वोपादानद्रव्योत्पन्नं तद् योगिभिरभिव्यज्यत इति वक्तुं शक्यम्, तस्य तादृक्सङ्कल्पव्यतिरेकेणोपादानान्तरशून्यत्वात्। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ।। इति।

सौजन्यतः कथायां तु संवित्स्वभावायत्तायां सत्तायां न कश्चित् पुष्पान्तरात् खपुष्पस्य भेदः। मायीयसत्तानुरोधे तु विधिनिषेधोभयव्यवहारौचित्यमन्यपुष्पाणाम्। अन्तरिक्षप्रसूनस्य तु निषेधविषयमात्राभिलापयोग्यत्वमित्यलमितरजनसुलभपदकपल्लवावखण्डन(?)पाण्डित्यप्रदर्शनेन।।३२।।

भगवती सत्, असत्, भाव, अभाव, भावाभाव आदि सभी हैं। सत् एवं असत्, सत्य एवं मिथ्या, भाव एवं अभाव, विधि एवं निषेध, सत्ता एवं असत्ता—सभी में एक अद्वितीय चित् शक्ति का ही सार्वत्रिक एवं सार्वभौम प्रसार एवं सञ्चार है।

चम्पक, कमल, चमेली आदि सामान्य पुष्पों से खपुष्प (गगन कुसुम) की कोई विशिष्टता नहीं है। संवित् शक्ति (चिच्छक्ति) ही सामान्य रूप से बिना किसी पक्षपात के आकाशकुसुम की विप्रतिपन्नता और सामान्य पुष्पों की सम्प्रतिपन्नता में स्फुरित हो रही है। स्फुरण में कोई भेद नहीं है; अतः चित् शक्ति के स्फुरण-सञ्चार की दृष्टि से खपुष्प (काल्पनिक नाम) एवं चम्पक आदि यथार्थ (सामान्य) पुष्प में कोई भेद नहीं है; क्योंकि सत्ता मात्र (चाहे भाव की सत्ता हो और चाहे अभाव की; व्यावहारिक सत्ता हो या प्रातिभासिक) शक्ति है। यदि कोई पक्षपात होता तो खपुष्प कभी स्फुरित ही नहीं होता अर्थात् उसकी काल्पनिक सत्ता भी नहीं होती। संवित् का स्फुरण भावाभाव सभी में समान रूप से विद्यमान है। संवित् शक्ति में भेदभाव नहीं है। जागतिक (मायिक) लोकव्यवहार में ही विधि-निषेधात्मक व्यवहार की भिन्नता मिलती है, पारमार्थिक सत्ता के सञ्चार में नहीं; वहाँ तो एकरसता है। भाव यह कि चाहे भावात्मक पदार्थ हो और चाहे अभावात्मक, सभी में संविदात्मक चिति शक्ति समान रूप से स्फुरित हो रही है।

परमात्मा एवं योगी तो निरुपादान होकर भी पदार्थों को उत्पन्न कर देते हैं—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।

जिस तरह से बिना उपादान के ही योगी पदार्थों का आविर्भाव कर दिया करते हैं, उसी प्रकार चिदात्मा देव स्वेच्छा से अन्तःस्थित तत्त्व का प्रकाशन करके पदार्थादि की सृष्टि करता है।

आचार्य महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं—

१. प्रसिद्धकुसुमाद् गगनकुसुमस्य सद्भावे को विशेषः? न कुतश्चिदिति वाक्योपसंहारः।

२. जहाँ तक जागतिक सत्ता की बात है या लोकव्यवहार की बात है (या प्रापञ्चिक व्यवहारों का प्रश्न है)—लोको हि विश्वव्यवहारस्वभावः। (परिमल)

३. जहाँ तक संवित् की बात है वहाँ—संविदेव भगवती ..... स्फुरणं प्रकाशमानत्वमेवानुप्राणनतया जीवभूततया परिगृह्य वर्तते।

४. भगवती संवित् का यह प्रस्फुरण भावाभाव दोनों में एकरस है—तच्च स्फुरणं विप्रतिपन्ने खपुष्पे सम्प्रतिपन्ने चम्पकादौ च सामान्यमपक्षपातेन प्रसरति।[१]

यदि भगवती भावाभाव सत्ता में अपने सञ्चार में पक्षपात करती तो?—यदि च तस्य तत्र पक्षपातेन प्रवृत्तिः तत् खपुष्पमित्यपि न स्फुरेत्।[२] अर्थात् तब तो खपुष्प की सत्ता ही न रह जाती।

अभिनवगुप्तपादाचार्य की दृष्टि—आचार्य अभिनवगुप्त कहते हैं कि वह परा सत्ता तो खपुष्प आदि सत्ता में भी व्याप्त है—सा हि खपुष्पादिकमपि व्याप्नोति।

शिवदृष्टिकार की दृष्टि—आचार्य सोमानन्दपाद कहते हैं कि—

शशशृङ्गादिकेनापि स्याद् विभक्त्या समन्वयः।

अर्थात् 'तस्मात् तत्रापि विभक्तियोगेन कारकत्वे सति सत्तैव शिवताख्या'।[३]

जिसे हम सामान्य कहते हैं अर्थात् सामान्यात्मक (जागतिक/व्यावहारिक) सत्ता कहते हैं, उसका स्वरूप क्या है? महेश्वरानन्द कहते हैं—

१. स्तम्भकुम्भादीनां भावानां प्रकाश एव सामान्यात्मनानुप्राणनः प्रवर्तते, न पुनः सामान्यं नाम पदार्थान्तरमित्युक्तं भवति। तत्र च विकल्परूपा व्यक्तयः। अविकल्पात्मा महाप्रकाशः सामान्यम्।

२. ततश्चानुवृत्तिप्रत्ययनिमित्तं सामान्यमित्याचक्षाणा वैशेषिकादयः प्रत्याख्याताः। प्रकाशस्याहेतुकत्वात्। प्रत्युत विश्वविलासं प्रत्यस्यैव हेतुत्वात् सर्वसामान्यमिति।[४]

इस प्रकार ग्रन्थकार को वैशेषिक दर्शन की सामान्यविषयक दृष्टि मान्य नहीं है। उनका कथन है कि—एतादृशस्य सामान्यस्य हि समवायिविशेषाद्यविशेषेण विश्वमेव विषयो न पुनर्द्रव्यादिरवच्छिन्नः पदार्थ इत्यर्थः। ..... गगनस्य पुष्पस्य च पृथक्-पृथक् सद्भावात्।[५]

३. यदि यह कहा जाय कि चम्पक-पाटल आदि पुष्प की व्यावहारिक सत्ता है; अतः वे सत्य हैं, किन्तु व्योमकुसुम तो प्रातिभासिक भी नहीं है; अतः तुच्छ कल्पना-मात्र है तो इस सम्बन्ध में यह कहना है कि योगियों के द्वारा तो व्योमकुसुम भी व्यावहारिक सत्य बन कर दृष्टिगत होने लगते हैं।[६]

और ऐसी स्थिति में तो—प्रतिभाप्ररोहासम्भवाद् मूकीभाव एव शरणं प्रतिवादिनो जनस्य। अतएव हि योगिनः केचिदाकाशादेरपि प्रसूनान्यानयन्तो दृश्यन्ते। न च तत्र स्वोपादानद्रव्योत्पन्नं तद् योगिभिरभिव्यज्यत इति वक्तुं शक्यम्।[७]

निष्कर्ष यह कि संवित् तत्त्व के स्वभाव से आयत्त सत्ता में सामान्य एवं खपुष्प में कोई भी भेद नहीं है—संवित्स्वभावायत्तायां सत्तायां न कश्चित् पुष्पान्तरात् खपुष्पस्य

१-७. परिमल

भेदः। केवल मायिक व्यवहार में ही इस विधि-निषेध का व्यवहार होता है—मायीय-सत्तानुरोधे तु विधिनिषेधोभयव्यवहारौचित्यमन्यपुष्पाणाम्।[१]

ईश्वरप्रत्यभिज्ञाकार की दृष्टि—आचार्य उत्पलदेव ने ईश्वरप्रत्यभिज्ञा में कहा है कि जिस प्रकार एक योगी बिना बाह्योपादान के ही पदार्थों की सृष्टि करने लगता है, उसी प्रकार चिदात्मा देव ही समस्त जगत् के भीतर भी स्थित है और उसके बाहर भी। वह अन्तःस्थित देवता ही स्वेच्छावश बाह्याभिव्यक्ति के रूप में जगदाकार होकर व्यक्त होता है—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।

अथर्ववेदोक्त देव्यथर्वशीर्ष की दृष्टि—इसमें भगवती अपने स्वरूप का इस प्रकार उद्घाटन करती है—अहं ब्रह्मस्वरूपिणी, मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च। अहमानन्दानानन्दौ। अहं विज्ञानाविज्ञाने। अहं ब्रह्माब्रह्मणी वेदितव्ये। अहं पञ्चभूतान्यपञ्चभूतानि। अहमखिलं जगत्। वेदोऽहमवेदोऽहम्। विद्याहमविद्याहम्। अजाहमनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम्। अहं रुद्रेभिर्वसुभिश्चरामि। अहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणावुभौ बिभर्मि। अहमिन्द्राग्नी अहमश्विनावुभौ। अहं सोमं त्वष्टारं पूषणं भगं दधामि। अहं विष्णुमरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि।

अर्थात् मैं ब्रह्मस्वरूप हूँ। मुझसे प्रकृति-पुरुषात्मक सद्रूप एवं असद्रूप जगत् उत्पन्न हुआ है। मैं आनन्द और अनानन्दरूपा हूँ। मैं विज्ञान और अविज्ञानरूपा हूँ। मैं सुविज्ञेय ब्रह्म एवं अब्रह्म भी हूँ। मैं पञ्चीकृत एवं अपञ्चीकृत महाभूत भी हूँ। मैं यह सारा दृश्य जगत् भी हूँ। मैं वेद और अवेद भी हूँ। मैं विद्या, अविद्या, अजा एवं अनजा भी हूँ। मैं नीचे-ऊपर, अगल-बगल भी हूँ। मैं रुद्रों एवं वसुओं में सञ्चार करती हूँ। मैं आदित्यों एवं विश्वदेवों के रूपों में फिरा करती हूँ। मैं मित्र और वरुण दोनों का, इन्द्र एवं अग्नि का और दोनों अश्विनीकुमारों का भरण-पोषण करती हूँ। मैं सोम, त्वष्टा, पूषा एवं भग को धारण करती हूँ। मैं त्रैलोक्य को आक्रान्त करने के लिये विस्तीर्ण पादक्षेप करने वाले विष्णु, ब्रह्मदेव एवं प्रजापति को धारण करती हूँ।

बहुत्व में एकत्व का सूत्र

नन्वासतामेते विगीता व्योमकुसुमादयः, यत्र मूकीभावो दूषणं भूषणं वेति नात्यन्तं निश्चितम्। यौ पुनर्भावाभावौ लोकव्यवहारसिद्धौ, तत्र कथमिदमभेदवादवैदग्ध्यमित्याशङ्क्याह—

माणिक्कमरदआण व भावाभावाण भेदपडिभासं।
एक्करसो अण्णोण्णं दोण्ण वि उप्फुसइ फुरणसम्भेओ ॥३३॥

---

१. परिमल

(माणिक्यमरकतयोरिव भावाभावयोर्भेदप्रतिभासम्।
एकरसोऽन्योन्यं द्वयोरप्युन्मार्ष्टि स्फुरणसम्भेदः।।)

मणि (लाल) एवं मरकत (श्याम) में परस्पर स्थित भाव एवं अनुभवरूप भिन्नता के प्रतिभास को (पारमात्मिक/पारमार्थिक) एकरस प्रकाश-स्फुरण (स्फुरण-सम्बन्ध) विलुप्त कर देता है।।३३।।

विश्वव्यवहारोऽपि हि स्तम्भकुम्भादेर्भावस्य तदभावस्य च द्वयोरन्योन्यं प्रतियोग्यनुयोगिभावाघ्रातो भेदप्रतिभासः परस्परवैलक्षण्येनावधारणं तम्, तयोः स्फुरणसम्भेद एवोन्मार्ष्टि युक्त्या तिरस्करोति। प्रकाशमानता हि स्फुरणम्। सैव सम्भेदः सम्बन्धः। स चैकरसः पदार्थद्वयं प्रत्येकस्वभावः, तयोर्द्वयोरपि प्रकाशत इति प्रतीतिं प्रति वैषम्याभावात्। ततश्च चिदग्निसात्कृतयोरनयोः को नाम वैलक्षण्यावभास इत्यर्थः। यथा माणिक्यमरकतयोररुणश्यामलयोरन्योन्यविरुद्धयोरपि किञ्चित्सन्निकर्षेणावस्थापितयोः परस्परप्रभापटलकर्बुरीभावादेकरसो भवन् प्रकाशमानतासम्भेदो भेदप्रतिभासं प्रतिमार्ष्टि, उभयोरपि स्वस्वरूपपरित्यागपूर्वमेकरूपतानुप्रवेशात्। यतो माणिक्यमप्यरुणश्यामलं मरकतमपि श्यामलारुणमिति वैचित्र्यशालिनी प्रतीतिरत्रोत्पद्यते। दर्शनान्तरमर्यादयाऽप्यभावो नाम स्तम्भकुम्भादिकैवल्यशाली भूतलादिः कश्चिद् भावविशेष एवेत्यूरीकृतम्। यदुक्तम्—

भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात् । इति।

स्तम्भादेर्भावस्य च कुम्भाद्यन्योन्याभावद्वारावतीर्णमभावत्वं चापरिहार्यमिति भावाभावयोर्युक्तिपर्यालोचनायामैकरूप्यमेवेति।।।३३।।

'एकस्तथा सर्वभूतान्तरात्मा रूपो-रूपो प्रतिरूपो बभूव, एकं सद्विप्रा बहुधा वदन्ति' आदि प्रमाण इसी अनेकता में एकता के साक्षी हैं। चूँकि माणिक्य लाल रंग का होता है और मरकत श्याम वर्ण का होता है; अतः दोनों में परस्पर भिन्नता होती है तथापि उनमें प्रवाहित (सञ्चरित, अनुस्यूत, प्रवहमान) एकात्मक प्रकाश-स्फुरण (उसमें भिन्नता के स्थान में) एकात्मता, एकरसता एवं एकता का सञ्चार किए रहता है। यह स्फुरण मणि एवं मरकत में समस्वभाव रहकर सञ्चरित है। दोनों ही दीप्ति में (अरुणिमा एवं नीलेपन की विभिन्न दीप्तियों में विद्यमान रहने पर भी) पृथक् रहकर भी प्रकाशस्फुरण की एकरूपता के कारण एकरूप ही माने जाने चाहिये।

दोनों रत्नों में भेद रंगों का है; किन्तु उनमें जो प्रकाश सञ्चरित है, वह तो रंगीन है नहीं; अतः प्रकाश की अनुस्यूतता या सञ्चरण की दृष्टि से वे दोनों अभिन्न हैं। परमात्मा में भावाभाव का भेद नहीं है, वह तो एकरस है। यह भावाभाव शून्य एवं एकरस परमात्मारूप प्रकाश दोनों में एकरस, एकस्वभाव एवं एकात्म होकर सञ्चरित है। इस प्रकाश-सम्भेद (प्रकाश-सम्बन्ध) की एकरूपता के कारण ही लाल रंग का मणि एवं

नीले रंग का मरकत (रंगों की दृष्टि से पृथक् होकर भी प्रकाश-सञ्चार की अभिन्नता के कारण) दोनों अभिन्न हैं।

स्फुरण क्या है? प्रकाशमानता हि स्फुरणम्।

सम्भेद क्या है? वही सम्भेद (सम्बन्ध) है।

इस प्रकाश का स्वभाव क्या है? स चैकरसः पदार्थद्वयं प्रत्येकस्वभावः, तयोर्द्वयोरपि प्रकाशत इति प्रतीतिं प्रति वैषम्याभावात्।

इन दोनों (मणि एवं मरकत) में चिदग्नि प्रज्वलित है; अतः दोनों में भेदावभास कैसा?

यदि लाल रंग के मणि एवं नीले रंग के मरकत को एक-दूसरे के सन्निकट रख दिया जाय तो मणि मरकत का नीला वर्ण एवं मरकत मणि का रक्तवर्ण धारण करके चितकबरे (कर्बुरीभावापन्न) रंग के हो जाते हैं और इस प्रकार दोनों में रंग की भिन्नता नष्ट होकर रंगसाम्य उत्पन्न हो जाता है अर्थात् प्रकाशमानता का सम्बन्ध दोनों में भेद-प्रतिभास को नष्ट कर देता है और इस प्रकार दोनों अपने पृथक्-पृथक् स्वरूपों को त्याग कर एकरूप हो जाते हैं। इसी प्रकार जगत् में जो भावाभावात्मक एवं भिन्नाभिन्नात्मक आदि अनेकात्मक द्वैत दृष्टियाँ एवं पदार्थ हैं और व्यवहारों में भेदबोध है, उन सभी में एक ही संवित् शक्ति या विमर्श सञ्चरित है; अतः सभी में एकात्मता स्थित है। प्रतीयमान भिन्नता एवं अनेकात्मता तो मायिक दृष्टि के कारण दृष्टिगत होती है अतः—

भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्।[१]

सम्भेद = सम्बन्ध। उन्मार्ष्टि = तिरस्कृत कर देता है, निराकृत कर देता है। भेद-प्रतिभास = भिन्न होने का आभास। उन्मार्ष्टि = प्रतिमार्ष्टि। एकतानुप्रवेश के द्वारा द्वैतभाव को दूरीकृत कर देता है। भेद = परस्परवैलक्षण्य का अनुभव। स्फुरण = प्रकाशमानता।

एकोऽहं बहु स्याम् की कामना ही तो एक को बहु बना देती है। दोनों में तात्त्विक भेद तो है नहीं, सृष्टि के सार्वत्रिक द्वैतभाव में एकत्व सर्वत्र अनुस्यूत है।

शरीर में परमात्मा की व्यापकता

ननु पौनःपुन्येन प्रसाधितमप्येतदर्थतत्त्वं तडिद्विलसितमेव केवलं परिस्फुरति। न पुनर्हृदयङ्गमो भवति। हृदयङ्गमीभावे च कश्चिदुपायो वक्तव्य इत्याकाङ्क्षां शिथिलयितुं पारमेश्वर्या सपर्यया भाव्यम्, सा च लोकतः पृथग्भूतेत्युद्भावयन्नादौ पीठं देवतां च पर्यालोचयति—

अण्डमए णिअपिण्डे पीठम्मि फुरन्ति कलणदेवीओ।
पप्फुरइ अ परमसिवो णाणणिही ताण मज्झआरम्मि ॥३४॥

---

१. परिमल

(अण्डमये निजपिण्डे पीठे स्फुरन्ति करणदेव्यः।
प्रस्फुरति च परमशिवो ज्ञाननिधिस्तासां मध्ये।।)

अपने अण्डात्मक शरीररूप पीठ में इन्द्रियों की अधिष्ठात्री देवियाँ स्फुरित होती रहती हैं; (किन्तु) उनके मध्य ज्ञानरत्नागारस्वरूप परमात्मा परमशिव (अपनी शक्तिमत्ता प्रकट करते हुये) स्फुरित (अभिव्यक्त) होता रहता है।।३४।।

स्वशरीरमयो हि पिण्डः पृथिव्यादिभूतपञ्चकारब्धत्वादशेषविश्ववैचित्र्यलक्षणमण्डमित्यध्यवसीयते। अण्डपिण्डयोरैकरूप्यमाम्नायेषु प्रसिद्धम्। यथा त्रिशिरोभैरवे—

**सर्वतत्त्वमयः कायस्तच्चेदानीं शृणु प्रिये ।
पृथिवी कठिनत्वेन द्रवत्वेऽम्भः प्रकीर्तितम् ।। इत्यादि।**

यथा च परमार्थसारसंग्रहे—

**षट्त्रिंशत्तत्त्वमृतं विचित्ररचनागवाक्षपरिपूर्णम् ।
निजमन्यदथ शरीरं घटादि वा तस्य देवगृहम् ।। इति।**

तत्र च पीठीभूते करणदेव्य इन्द्रियलक्षणाः शक्तयः स्फुरन्ति। आवाहनसन्निधापनतिरोधानादिव्यतिरेकेऽपि स्वयमेव स्फुटं प्रकाशन्ते। तासां मध्ये च परमशिवो महाप्रमातृस्वभावः प्रस्फुरति ताः शक्तीः प्रति स्वस्य शक्तिमत्ता यथा प्रकटीभवति तथा प्रकाशते। यतोऽयं ज्ञाननिधिः, तत्तदिन्द्रियशक्त्युदयोन्मीलितानां संविद्विकल्पानां समुद्र इव सरित्प्रवाहाणां पर्यन्ततः प्रतिष्ठाभूमिरित्याम्नायते। इन्द्रियशक्तीनां च तासां न कदाचिच्छब्दस्पर्शाद्यनुवेधं विनाऽवस्थानम्। शब्दस्पर्शादय एव च पञ्च महान्ति भूतानीति विश्वमय्यस्ता इत्युक्तं भवति। यदुक्तम्—

**शक्तिश्च शक्तिमांश्चेति पदार्थद्वयमुच्यते ।
शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांश्च महेश्वरः ।। इति।**

**सर्वाः शक्तीश्चेतसा दर्शनाद्याः स्वे स्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भभूतस्तिष्ठन् विश्वाकार एको विभाति ।।**

इति श्रीकक्ष्यास्तोत्रस्थित्या स्वात्मरूपः परेश्वर एवान्तश्चक्रदेवता बाह्यान्तरभिन्नाः। करणशक्तयश्च तदावरणदेवतास्थानीयाः। तदर्चनं च स्वशरीरात्मनि महापीठ एवोपपद्यते। तत्र च यथा प्रतिमापुस्तकादयो भावाः स्वात्मभूतां मुख्यां देवतां प्रति प्रतिनिधिभावेनाध्यवसीयन्ते, तद्वत् स्वदेहस्यैव मुख्यतया पीठत्वम्। अनुकल्पोपकल्पतया तु स्थण्डिमण्डलादीनामङ्गीकार इति तात्पर्यार्थः।।३४।।

परमार्थसारसंग्रहकार का कथन है कि षट्त्रिंशदात्म विश्व में अपना जो शरीर

है, वह भी भगवान् का प्रत्यक्ष मन्दिर है—

षट्त्रिंशत्तत्त्वमृतं विचित्ररचनागवाक्षपरिपूर्णम्।
निजमन्यदथ शरीरं घटादि वा तस्य देवगृहम्।।

षट्त्रिंशदात्म अण्डरूप विश्ववैचित्र्य में परमशिव अपनी शक्ति का सञ्चार करते हुये अपनी शक्तिमत्ता उन्मिषित करता रहता है। परमेश्वर स्वात्मदेवता ही तो है। वही चक्रदेवता है और करणों की शक्तियाँ तदावरण देवता हैं। उस देवता का निवास विश्वरूप शरीर में है। चूँकि पिण्ड एवं अण्ड में एकरूपता है; अत: वह प्रत्येक पिण्ड में भी अवस्थित है। पिण्डाण्ड-सामरस्य नाथ-योग एवं तान्त्रिक दर्शन की एक प्रमुख विशेषता है।

महेश्वरानन्द की दृष्टि—आचार्य महेश्वरानन्द कहते हैं कि स्वशरीरात्मक पिण्ड पृथि-व्यादिभूत पञ्चतत्त्वों से निर्मित विश्ववैचित्र्यमय ब्रह्माण्ड भी है—स्वशरीरमयो हि पिण्ड: पृथिव्यादिभूतपञ्चकारब्धत्वादशेषविश्ववैचित्र्यलक्षण-मण्डमित्यध्ववसीयते। अण्डपिण्डयोरैकरूप्यमाम्नायेषु प्रसिद्धम्।[१] पिण्डब्रह्माण्डैक्यवाद का आगमिक सिद्धान्त योग एवं समस्त तन्त्रों में स्वीकृत है।

त्रिशिरोभैरवकार की दृष्टि—त्रिशिरोभैरवकार का कथन है कि शरीर सर्वतत्त्व-मयात्मक है—

सर्वतत्त्वमय: कायस्तच्चेदानीं शृणु प्रिये।
पृथिवी कठिनत्वेन द्रवत्वेऽम्भ: प्रकीर्तितम्।।

शरीर में विद्यमान काठिन्य पृथ्वी एवं रक्तादिक में द्रवत्व 'जलतत्त्व' की स्थिति का प्रमाण है। शरीर षट्त्रिंशदात्मक है।

परमार्थसारसंग्रहकार की दृष्टि—परमार्थसारसंग्रह में कहा गया है कि शरीर ब्रह्माण्ड की भाँति छत्तीस तत्त्वों से युक्त है।

इस पीठभूत देह में करणों की अधिष्ठात्री देवियाँ (शक्तियाँ) इन्द्रियों के रूप में अधिष्ठित हैं। ये शक्तियाँ देवियों पूजा के अङ्गभूत—आवाहन, सन्निधापन, तिरोधान आदि के विना भी स्वयमेव विद्यमान रहती हैं। उनके मध्य महाप्रमातृस्वभाव परमशिव सदैव स्फुरित होते रहते हैं। उनकी ये शक्तियाँ उन परमशिव की शक्तिमत्ता को प्रतिक्षण व्यक्त करती रहती हैं। इसके कारण ज्ञान-निधि (ज्ञान के अनन्त रत्नागार) परमशिव उन-उन इन्द्रियों में उन्मीलित विभिन्न शक्तियों में शब्द-स्पर्श-रूप-रस-गन्ध नामक अनुभूतियों को प्राप्त करने की शक्ति उसी शक्तिमान परमशिव से ही आती है।

यह भी सत्य है कि समस्त जगत् में केवल दो ही पदार्थ हैं—शक्ति और शक्तिमान।

---

१. परिमल

जगत् क्या है? शक्ति ही जगत् है और शक्तिमान केवल महेश्वर शिव है—

शक्तिश्च शक्तिमांश्चेति पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांश्च महेश्वरः।।

कक्ष्यास्तोत्रकार की दृष्टि—

सर्वाः शक्तिश्चेतसा दर्शनाद्याः स्वे स्वे वेद्ये यौगपद्येन विष्वक्।
क्षिप्त्वा मध्ये हारकस्तम्भभूतस्तिष्ठन् विश्वाकार एको विभाति।।

महेश्वरानन्द कहते हैं कि स्वात्मरूप परमेश्वर ही अन्तश्चक्र देवता है—स्वात्मरूपः परमेश्वर एवान्तश्चक्रदेवता बाह्यान्तरभिन्नाः।[१]

अन्तःकरण की शक्तियाँ शिव के आवरणदेवता हैं। उनका अर्चन होते रहने के कारण अपना शरीर ही महापीठ है। प्रतिमा, स्तोत्रपाठ, नीराजना, अर्घ्य, ध्यान आदि सारे पूजा-विधान (तत्त्वतः बाह्य पदार्थ नहीं हैं) आन्तर प्रेम के भाव हैं; क्योंकि ये भाव तो हृदय में ही उठते हैं; अतः बाह्योपादान-सापेक्ष बाह्यवर्तिनी पूजा के पूर्व अन्दर ही भगवत्पूजा हो जाती है (भावात्मक पूजन निष्पन्न हो चुकता है); अतएव अपना शरीर मुख्य पीठ है।

पूजा का तात्त्विक स्वरूप

महेश्वरानन्द की दृष्टि—

१. स्वात्मरूपः परमेश्वर एवान्तश्चक्रदेवता बाह्यान्तरभिन्नाः।

२. करणशक्तयश्च तदावरणदेवतास्थानीयाः।

३. तदर्चनं च स्वशरीरात्मनि महापीठे एवोपपद्यते।

४. तत्र च यथा प्रतिमापुस्तकादयो भावाः स्वात्मभूतां मुख्यां देवतां प्रति प्रतिनिधिभावेनाध्यवसीयन्ते, तद्वत् स्वदेहस्यैव मुख्यतया पीठत्वम्।

५. अनुकल्पोपकल्पतया तु स्थण्डिलमण्डलादीनामङ्गीकार इति तात्पर्यार्थः।[२]

भावनोपनिषद् में व्यक्त दृष्टि—भावनोपनिषद् में भी महेश्वरानन्द की दृष्टि का पहले से प्रतिपादन मिलता है; क्योंकि शक्तिमान वहाँ कहा गया है—

१. कामेश्वरी सदानन्दघना पूर्णा स्वात्मैक्यरूपदेवता।

२. नवरन्ध्ररूपो देहो नवशक्तिमयं श्रीचक्रम्।

३. क्रियाशक्तिः पीठम्।

४. कुण्डलिनी ज्ञानशक्तिर्गृहम्।

५. ज्ञाता होता।

६. ज्ञानमर्घ्यम्।

१-२. परिमल

७. ज्ञेयं हवि:। आदि।

पीठतत्त्व और उसका स्वरूप—प्रकाश और विमर्श की मात्राओं का साम्यभाव ही पीठ है। यथा—अम्बिका और शान्ता शक्तियों का साम्यभाव (सामरस्य) कामरूपपीठ है। इसी प्रकार साम्यभावस्थ अनेक पीठ हैं। पीठ आसन एवं वासस्थान को भी कहते हैं। जिस स्थान में जगन्माता अधिष्ठित हैं, उसे देवीपीठ कहते हैं।

प्राणमय कोश की सहायता से दैवी शक्ति को विकसित करने वाले या देवताओं के आसन के उपयोगी जो आवर्त बनते हैं, उन्हें पीठ कहते हैं—

देव्या: शक्तेर्विकासस्य देवानामासनस्य वा।
उपयोगी जायतेऽसावावर्त्त: पीठ उच्यते।।

पीठ की उत्पत्ति प्राणमय कोश में होती है। महर्षि अङ्गिरा कहते हैं—पीठस्याविर्भाव: प्राणमये। (दैवीमीमांसादर्शन, स्थितिपाद सू०-१६)

पीठ दैवी शक्तियों का आसन है, जो प्राणमय कोश की सहायता से निर्मित होता है।



इसी पीठ पर देवता आदि शक्तियों का आविर्भाव होता है। यह देवयोनि का अधिष्ठान है।

जिस प्रकार राग और द्वेष के समन्वय से साधक के अन्त:करण में सत्त्वगुणमूलक-तत्त्वज्ञान का उदय होता है, उसी प्रकार प्राणमय जगत् में आकर्षण और विकर्षणरूपी

दोनों शक्तियों के समन्वय से सत्त्वगुणमूलक और देवाधिष्ठानरूपी पीठ का आविर्भाव हुआ करता है। जिस प्रकार संसार के अणु-परमाणु में आकर्षण एवं विकर्षण स्थित हैं, उसी प्रकार प्राणमय जगत् में आकर्षण और विकर्षणरूपी शक्तियों के समन्वय से पीठ का आविर्भाव होता है। आकर्षण रजोमूलक है, राग रजोमूलक है। विकर्षण तमोमूलक है, द्वेष तमोमूलक है। राग और द्वेष के समन्वय से अन्त:करण में तत्त्वज्ञान का उदय होता है।

पीठ के आविर्भाव-हेतु जो स्वाभाविक-अस्वाभाविक कौशलपूर्ण क्रिया निष्पादित की जाती है, उसे ही चक्र कहते हैं। यह मानवपिण्डरूपी पीठ उत्पन्न करने की क्षमता रखता है। मानवपीठ आवागमन-चक्र का आधार है।

ब्रह्माण्ड एवं पिण्ड के प्राणमय विभाग में जहाँ-कहीं भी आकर्षण-विकर्षण शक्ति-रूपिणी परस्पर द्वन्द्वशक्तियों का समन्वय स्वत: या कौशलपूर्ण क्रिया से उत्पन्न किया जाता है; वहीं पीठ उत्पन्न हो जाता है।

सूर्यादि ग्रहों का पीठ, तीर्थादिक पीठ, नर-नारी-सम्बन्धरूप पीठ, मूर्ति, यन्त्र, चित्र आदि में स्थित उपासनापीठ आदि सभी पीठों में आकर्षण-विकर्षण शक्तियों के समन्वय से अलौकिक पीठ का आविर्भाव हो जाता है।

पीठ सत्त्वमूलक होने के कारण आनन्दप्रद है—पीठमानन्दप्रदं सत्त्वप्राधान्यात्।
(स्थितिपाद-२०)

पीठ शक्तिद्वय का सामरस्य है। सृष्टि पञ्चधा है। अत: पीठ भी पञ्चधा है। अधिष्ठान का स्थान होने के कारण पीठ उपासना में सहायक है। स्थूल एवं सूक्ष्म का संयोजक होने के कारण यह दैवजगत् का प्रमापक है और सत्त्वगुणविशिष्ट होने के कारण तीर्थ का प्रतिष्ठापक है।

पीठों की श्रेणियाँ—पीठों की अनेक श्रेणियाँ हैं; यथा—

(क) १. स्थावरपीठ, २. सहजपीठचक्र, ३. दैवीपीठ तथा ४. यौगिकपीठ।

(ख) १. उपासना पीठ (१६ भेद), २. पार्थिवपीठ (तीर्थस्थान आदि) ३. जीव-यान्त्रिक पीठ (शवसाधन आदि), ४. स्थूलयान्त्रिक पीठ (प्रेतादिक सम्बद्ध), ५. सहज-पीठ (ग्रहों का पीठ)।

भगवती स्वयं पीठरूपा हैं। इसीलिये ललितासहस्रनाम में भगवती त्रिपुरसुन्दरी को ५० पीठों के रूप में स्थित कहा गया है—

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी।

भाष्यकारों ने पञ्चाशत् (५०) पद को एकपञ्चाशत् (५१) में स्थिर किया है। योग की तान्त्रिक प्रक्रिया में पीठों की अत्यन्त रहस्यात्मक व्याख्या की गयी है। चार पीठ मुख्य हैं—

१. कामरूप पीठ ३. उड्डीयान पीठ
२. पूर्णगिरि पीठ ४. जालन्धर पीठ

कामरूप पीठ—अम्बिका शक्ति और शान्ता शक्ति का सामरस्य ही काम-रूप पीठ है। जब परा शक्ति अपने गर्भ में स्थित एवं अपने साथ एकीभूत विश्व (प्रकाश) को देखने हेतु उन्मुख होती है, तब मात्रावच्छिन्न शक्ति और शिव साम्यभाव में स्थित होकर एक बिन्दु के रूप में परिणत हो जाते हैं। इसके परिणामस्वरूप चैतन्य ज्योतिर्लिङ्ग के स्वरूप में प्रकट होता है। यह बिन्दु ही कामरूप पीठ है—



शक्त्यंश (१/२) + शिवांश (१/२) के समन्वय से कामरूप-पीठ का आविर्भाव होता है। शान्ता शक्ति (इच्छाशक्ति) + अम्बिकाशक्ति (वामा शक्ति) के योग से स्वयम्भूलिङ्ग एवं परावाक् से युक्त कामरूप पीठ का प्रादुर्भाव होता है।

पूर्णगिरि पीठ—पूर्णगिरि पीठ इच्छाशक्ति और वामाशक्ति के सामरस्य की परिणति है। इसे वाणी की दृष्टि से पश्यन्ती वाक् की अवस्था कह सकते हैं। शान्ता-शक्ति इच्छाशक्ति के रूप में एवं शिवांश अम्बिकाशक्ति वामाशक्ति के रूप में आविर्भूत होती है। इन दोनों शक्तियों के अद्वयात्मक सामरस्य से एक बिन्दु का आविर्भाव होता है। इस बिन्दु को ही पूर्णगिरि पीठ कहते हैं—

शक्त्यंश—इच्छाशक्ति एवं शिवांश—वामाशक्ति के अद्वैतभावापन्न सामरस्य से जिस बिन्दु का आविर्भाव होता है, उसकी संज्ञा है—पूर्णगिरि पीठ। इससे अभिव्यक्त चैतन्य की संज्ञा है—बाणलिङ्ग।

उड्डीयान पीठ—जब इच्छाशक्ति क्रियाशक्ति के रूप में परिणत हो जाती है और

रौद्री शक्ति के साथ सामरस्य को प्राप्त करती है तो उड्डीयान पीठ का निर्माण करती है—

जालन्धर पीठ—ज्ञानशक्ति एवं ज्येष्ठा शक्ति का सामरस्य ही जालन्धर पीठ है। पीठों में जिन पश्यन्ती, मध्यमा और वैखरी का अन्तर्भाव है, वे प्रणव के अकार, उकार एवं मकारमात्र हैं। ये त्रिलोक, त्रिदेव, त्रिकाल, परावाक् के वाक्त्रय हैं।

त्रिकोणगर्भित महात्रिकोण, जिसमें बिन्दु स्थित है, विश्व का मूल है। त्रिकोण की तीनों रेखायें—पश्यन्ती-मध्यमा-वैखरी, सृष्टि-स्थिति-संहार, वामा-ज्येष्ठा-रौद्री, ब्रह्मा-विष्णु-रुद्र और इच्छा-ज्ञान-क्रिया आदि का प्रतीक हैं।

इच्छाशक्ति की परावस्था में ज्ञानशक्ति का उदय होता है। शक्त्यंश—ज्ञानशक्ति और शिवांश—ज्येष्ठाशक्ति का सामरस्य ही जालन्धर पीठरूप बिन्दु के रूप में आविर्भूत होता है।

कामरूप पीठ में दूरान्तिक, अतीतानागत एवं कार्य-कारण का व्यवधान नहीं है। यह आवरण, विक्षोभ, चाञ्चल्यातीत भूमि है। यह प्रशान्तावस्था है।

शब्द की द्वितीय भूमि में इच्छाशक्ति के उन्मेष के साथ नित्यमण्डलात्मक सृष्टि का विकास होता है। यह शक्तिगर्भ में बीजभूत विश्व की अवस्था है।

इसी भूमि से काल का प्रभाव प्रारम्भ होता है। यहाँ अक्रम नहीं, सक्रम सृष्टि है। इसी भूमि से देश और कार्य-कारणभाव का स्फुरण होता है।

इस प्रकार आध्यात्मिक-साधना में चतुष्पीठों का विशेष महत्त्व है।

परमेश्वर की पूजन-प्रक्रिया

ननु सोऽयमलौकिकः परमेश्वरः कीदृश्या प्रक्रिययोपास्य इत्याकाङ्क्षायां सानुग्रहमाह—

सो तत्थ अच्चणिज्जो विमरिसपुप्फाहिवाससुरहीहिं ।
चित्तचसअप्पिएहिं वेज्जसुहावीरपाणवत्थूहिं ॥३५॥

(स तत्रार्चनीयो विशर्मपुष्पाधिवाससुरभिभिः ।
चित्तचषकार्पितैर्वेद्यसुधावीरपाणवस्तुभिः ॥)

वह (शिव) वहाँ (पिण्डरूपात्मक पूजास्थल = पीठ में) प्रत्यभिज्ञारूप परामर्श या स्वात्मविमर्शरूप पुष्प में अवस्थित (अधिवासित) सुगन्धियों से (अभिमन्त्रित) चित्तरूप प्याले द्वारा अर्पित विश्वपदार्थात्मक अमृत से अर्चनीय है॥३५॥

सः वेदागमादिप्रसिद्धस्वभावः परमेश्वरः, तत्र पिण्डात्मनि पीठे पूजनीयः। पूजायां च वेद्यमयी या सुधा सर्वेन्द्रियाह्लादकत्वादत्यन्तस्वीकार्या, सा स्वभावत एकापि सती भयशोकहर्षाद्यवस्थावैचित्र्यादम्लतिक्तमधुरादिप्रायानेकरसविशेषोपश्लेषिणी वीरस्य परभैरवस्य वीरायाश्च स्वातन्त्र्यमय्यास्तत्प्रधानशक्तेः, वीराणां योनितत्सिद्धादिरूपाणां भैरवमिथुनानां च पीयते स्वात्मसात्क्रियत इति व्युत्पन्नानां श्रीमच्चतुस्त्रोतोगोप्यमानानां वस्तूनां विश्वविलासासवोपलक्षितानां द्रव्याणां प्रकृष्टतया पूजाङ्गत्वेनोपयुज्यते। ततश्च यानि तानि वेद्यामृतमयानि कुलद्रव्याणि तान्येव पूजासाधनानीत्यर्थः। तानि च स्वचित्तात्मनि चषके ग्रहणयुक्त्या कयाचिदर्पणीयानि। चित्तस्य चषकत्वं च तत्र तत्र बहुप्रवाहं प्रसर्पतां वेद्यवस्तूनां स्वात्मभैरवस्यैकयैव हेलया तद्ग्रहणसौकर्योपायत्वात्। विश्ववर्तिनो हि भावा बहिर्भिन्नप्रकारं स्फुरन्तस्तत्तदिन्द्रियपरिस्पन्दोपगृह्यमाणस्वभावाः क्षणं चित्ते विश्रम्य पश्चात् तत्प्रणाडिकया भैरवात्मन्यनुप्रविशन्तीत्यतिसुभगेयं सरणिः। यदुक्तं श्रीमहानयप्रकाशे—

भावा वृत्तिषु ताश्चित्ते चित्तं संविदि सा परे ।
व्योम्न्यस्तङ्गमितो यत्र क्रम उल्लङ्घनात्मकः ॥ इति।

अथ च तानि वस्तूनि परेश्वरं प्रति स्वात्मतया यो विमर्शः प्रत्यभिज्ञानात्मा परामर्शः, स एव पुष्पम्, स्वभावपोषकत्वात् श्रीगुरुरूपत्वाच्च। तेन मन्त्रशक्त्यात्मना सुरभीकर्तव्यानि, अन्यथा पर्युषितादाविव तत्र शास्त्रार्थभङ्गप्रसङ्गात्। एतदुक्तं भवति—पूर्वं तावत् पीठतया देहमभ्यर्च्य तन्मध्ये हृदयव्योमरूपे स्वात्मरूपमहाप्रकाशलक्षणं परमेश्वरमनुसन्धाय, तमभितः प्रसरन्तीरिन्द्रियशक्तीश्च विचिन्त्य, तदनु सर्वान्तःकरणसमष्टिलक्षणे स्वचित्ते विश्ववेद्यविलासलक्षणमर्घ्यद्रव्यमापूर्य,

तच्च पारमेश्वरपरामर्शमय्या मन्त्रशक्त्या संस्कृत्य, तेनैव कुलामृतेन निजावरण-देवतापरिमण्डलितोऽयं परमेश्वरः पूजनीय इति। अयं च सङ्कोचविकासयोगादे-कारमारभ्याऽसङ्ख्यारपर्यन्तमागमेष्वर्चनीयतया आम्नायते। यदुक्तं श्रीतन्त्रालोके—

एकवीरो यामलोत्थस्त्रिशक्तिश्चतुरात्मकः ।
पञ्चमूर्तिः षडात्माऽयं सप्ताष्टकविभूषितः ।।
नवात्मा दशदिक्शक्तिरेकादशनिजात्मकः ।
द्वादशारमहाचक्रनायको भैरवः स्थित ।।
एवं यावत् सहस्त्रारे निस्संख्यारेऽपि वा विभुः ।
विश्वचक्रे महेशानो विश्वशक्तिर्विजृम्भते ।। इति।

एतत्तात्पर्येणैव स्त्रोतश्चतुष्टयोपपादितानां पद्धतीनां प्रवृत्तिरित्येतावन्मात्र-पर्यवसायि पूजारहस्यम्। बाह्यस्तु प्रसूनाक्षतासवधूपदीपघण्टादिस्वभावः प्रपञ्चोऽस्माभिः 'अधिकं नैव दुष्यति' इति न्यायादाद्रियत इति। एतदुपर्यप्या-लोचयिष्यते।।३५।।

परमेश्वर के पूजन की प्रक्रिया—पहले शरीर को पीठ के रूप में पूजकर फिर उसके मध्य हृदय-व्योम में स्वात्मारूप परमेश्वर का संधान करके, उसके चतुर्दिक इन्द्रिय-शक्तियों का चिन्तन करके, फिर (अन्तःकरणात्मक) चित्त में विश्वरूप वेद्य के विलास के अर्घ्य को भरकर और उसे पारमेश्वर परामर्श से युक्त मन्त्रशक्ति से संस्कारित करके उस कुलामृत से अपने आवरण देवताओं से परिमण्डलित परमेश्वर की पूजा करनी चाहिये।

चित्तचषक = चित्तरूप प्याला (अमृत से भरा प्याला)। शरीर = शरीर ही पूजास्थल या पीठ है। अर्घ्य = विश्व वेद्य विलास, अधिवास = महासुगन्ध, इत्र, निवासस्थल। पूजोपकरण = विश्ववैचित्र्य विलास में प्रवाहित भाव। सुधा = वेद्यमयी सुधा। पुष्प = प्रत्यभिज्ञारूप परामर्श। स्वात्म विमर्श रूप पुष्प। वीर = परभैरव। अर्चना = मान्त्री शक्ति से अभिमन्त्रित। अधिवासित = पुष्प की सुगन्धों से की जाने वाली पूजा। सः = परमेश्वर। तत्र = पिण्ड में।

यहाँ विश्वविलास का आसव ही द्रव्य एवं पूजाङ्ग है। पाण = व्यवसाय, व्यापार, इकरारनामा, हाथ, प्रशंसा, खेल, खेल का दाँव।

सुधा = समस्त इन्द्रियों को आह्लाद प्रदान करने वाली तथा पूजा में वेद्यमयी। यद्यपि वह स्वभाव में एकरूपा है तथापि भय-शोक-हर्ष आदि अवस्थावैचित्र्य के कारण अम्ल-तिक्त-मधुर आदि अनेक रस विशेषोपश्लेषिणी सुधा।

वीरस्य = परमभैरव का। वीरायाः = स्वातन्त्र्यमयी शक्ति का। वीराणां = भैरव-मिथुन का।

यहाँ पूजाङ्ग कौन है? विश्वविलासोपलक्षित द्रव्य ही पूजाङ्ग है—विश्वविलासासवोपलक्षितानां द्रव्याणां प्रकृष्टतया पूजाङ्गत्वेनोपयुज्यते।

वेद्य = अमृतमय कुलद्रव्य ही पूजा के साधन हैं—वेद्यामृतमयानि कुलद्रव्याणि तान्येव पूजासाधनानि।

चषक क्या है? चित्त ही चषक है—स्वचित्तात्मनि चषके ग्रहणयुक्त्या कयाचिदर्पणीयानि। चित्तस्य चषकत्वम्।

यही पूजा स्वात्म भैरव ग्रहण करते हैं।

सारे विश्ववर्ती भाव अनेक प्रकार के हैं। ये स्व-स्व सम्बद्ध इन्द्रियों के परिस्पन्द हैं। ये क्षण भर चित्त में विश्राम लेकर फिर भैरवात्मा में प्रविष्ट हो जाते हैं।

महानयप्रकाशकार की दृष्टि—महानयप्रकाश में कहा गया है—

भावा वृत्तिषु ताश्चित्ते चित्तं संविदि सा परे।
व्योम्न्यस्तङ्गमितो यत्र क्रम उल्लङ्घनात्मकः।।

पुष्प क्या है? समस्त वस्तुएँ परमेश्वर के प्रति स्वात्मतया विमर्श (प्रत्यभिज्ञानात्मा परामर्श) के रूप में अर्पित होने पर पुष्प ही की आख्या प्राप्त करती हैं—अथ च तानि वस्तूनि परमेश्वरं प्रति स्वात्मतया यो विमर्शः प्रत्यभिज्ञानात्मा परामर्शः, स एव पुष्पम्।

निष्कर्ष—पीठतया देहमभ्यर्च्य तन्मध्ये हृदयव्योमरूपे स्वात्मरूपमहाप्रकाशलक्षणं परमेश्वरमनुसन्धाय, तमभितः प्रसरन्तीरिन्द्रियशक्तीश्च विचिन्त्य तदनु सर्वान्तःकरणसमष्टिलक्षणे स्वचित्ते विश्ववेद्यविलासलक्षणमर्घ्यद्रव्यमापूर्य, तच्च पारमेश्वरपरामर्शमय्या मन्त्रशक्त्या संस्कृत्य, तेनैव कुलामृतेन निजावरणदेवतापरिमण्डलितोऽयं परमेश्वरः पूजनीय इति।[१]

तन्त्रालोककार की दृष्टि—अभिनवगुप्तपादाचार्य तन्त्रालोक में कहते हैं—

एकवीरो यामलोत्थस्त्रिशक्तिश्चतुरात्मकः।
पञ्चमूर्तिः षडात्माऽयं सप्ताष्टकविभूषितः।।
नवात्मा दशदिक्शक्तिरेकादश निजात्मकः।
द्वादशारमहाचक्रनायको भैरवः स्थितः।।
एवं यावत् सहस्रारे निस्संख्यारेऽपि वा विभुः।
विश्वचक्रे महेशानो विश्वशक्तिर्विजृम्भते।।

यहाँ चतुष्टयोपपादित पद्धतियों को भी पूजा में अन्तर्गृहीत किया गया है।

परिमलकार की दृष्टि—बाह्यपूजा तो प्रसून, अक्षत, आसव, धूप, दीप, घण्टा आदि की अपेक्षा रखती है; किन्तु वास्तविक पूजा तो इत्याकारक ही है—

१. परिमल

स तत्रार्चनीयो विमर्शपुष्पाधिवाससुरभिभिः।
चित्तचषकार्पितैर्वेद्यसुधावीरपाणवस्तुभिः ।।[१]

परमेश्वर शिव इस अण्डरूप निज पिण्डपीठ में अर्चनीय है, अन्यत्र नहीं। इस अर्चना में वेद्यमयी सुधा जो भय-शोक-हर्ष आदि अवस्थाओं के वैचित्र्य से अम्ल, तिक्त एवं मधुरप्राय है, समस्त इन्द्रियों को आह्लादित करने से परमानन्दमयी, एकरसमयी एवं कुलामृतस्वरूपिणी है और जिसे उन-उन आवरणदेवतारूपा शक्तियों के साथ परमभैरव द्वारा आत्मसात् किया जाता है।

चित्त ही इस अमृत पदार्थ के पानार्थ चषक है। विश्ववैचित्र्यात्मक विलास में प्रवाहित भाव ही अन्तःप्रविष्ट होकर शिव की पूजा के द्रव्य में पूजोपकरण है। परमेश्वर के प्रति स्वात्मरूप विमर्श या प्रत्यभिज्ञात्मक परामर्श ही पुष्प है। इसकी अर्चना मान्त्री शक्ति से अभिमन्त्रित एवं अधिवासित सुमन-सौरभों से निष्पन्न की जाती है। पीठ (पूजा स्थल) के रूप में शरीर ही अभ्यर्चनीय है। हृदयाकाश में ही परमेश्वर का सन्धान करना है।[२]

इन्द्रिय शक्तियों का ध्यान करके सर्वान्तःकरण समष्टिरूपात्मक स्वचित्त में विश्ववेद्य-विलासरूप अर्घ्य द्रव्य आपूरित करके उसे पारमेश्वर मान्त्री शक्ति से संस्कारित करके उसी कुलामृत से निजावरण देवता परिमण्डलित परमेश्वर की अर्चना करनी चाहिये।

परमेश्वर की पूजा आङ्गिक-प्रदर्शन, शारीरिक व्यापार, भौतिक वस्तुओं का समर्पण आदि नहीं है; प्रत्युत भाव-समर्पण है; अतः उनकी पूजा-अर्चना का भी वही स्वरूप होना चाहिये। इसीलिये शास्त्रकारों ने भगवान् की पूजा के रहस्यों पर भी गम्भीरतापूर्वक चिन्तन-मनन करते हुये प्रत्येक पूजाङ्ग को प्रतीकात्मक एवं भावनात्मक रूप में स्वीकार किया है। उनके पीछे वैज्ञानिक पृष्ठभूमि प्रस्तुत की है, यथा—जप को ही ले लीजिए।

आचार्य सोमानन्दपाद की दृष्टि—

(क) जप का स्वरूप—

सन्ततं शक्तिसन्तानप्रसरेण सदैव मे।
अनिरुद्धो जपोऽस्त्येव सर्वावस्थास्वसौ जपः।।
नानाकारैः सदा कुर्वन्नुदयन् सर्ववस्तुगः।
अभ्यासेनास्मि सोऽप्यत्र जपः परम उच्यते।।
सो हि नाम जपो ज्ञेयः सत्यादिस्त्रिविधो हि सः।

(ख) ध्यान का स्वरूप—

ध्यानं नामात्र यत्सर्वं सर्वाकारेण लक्ष्यते।
भावनाचक्षुषा साध्वी सा चिन्ता सर्वदर्शिनी।

१. महार्थमञ्जरी २. परिमल

येन येनेन्द्रियेणार्थो गृह्यते तत्र तत्र सा।
शिवता लक्षिता सत्या तद्ध्यानमपि वर्ण्यते।।
यस्यां यस्यां प्रतीतौ तु शिवोऽस्मीति मनोगमः।
तस्यां तथैव चिन्तायां तद् ध्यानमपि जल्पितम्।।

(ग) योग का स्वरूप—

यस्मिन्नर्थे सदा त्यागो गच्छतस्तिष्ठतोऽपि वा।
धावतः खादितो वाऽपि स योगः परमयोगिनः।।

(घ) ध्यान का भावनात्मक समावेशात्मक स्वरूप—सोमानन्दपाद कहते हैं कि शाक्तोपाय एवं शाम्भवोपाय में परमात्मा की पूजा-अर्चना स्वयं परमात्मस्वरूप हो जाती है; क्योंकि उस समय पूजक एवं अर्चक परमात्मा से तादात्म्यभाव प्राप्त करके इस प्रकार तादूप्यभावापन्न हो जाता है और सर्वत्र शिवभावापन्न हो उठता है—

१. स्थितोऽहं परमः शिवः।
२. प्रतिपादितमेतावत् सर्वमेव शिवात्मकम्।
३. भवति शिवमयात्मा सर्वभावेन सर्वः।
४. शिवोऽस्मि साधनाविष्टः शिवोऽहं याजकोऽप्यहम्।
५. शिवं यामि शिवो यामि शिवेन शिवसाधनः।[१]
६. भिन्नोऽप्यभिन्न एवास्मि शिव इत्थं विचेष्टनम्।
७. शिवो भोक्ता शिवो भोज्यं शिवेषु शिवसाधनः।
८. शिवः कर्ता शिवः कर्म शिवोऽस्मि करणात्मकः।
शिव एव कलावस्था व्यापार इति साधुषु।।
९. स्थिते शिवत्वे बद्धास्थो भवेत् सर्वगतः शिवः।[२]

इसी स्थिति में विश्वात्मैक्य की भी अनुभूति होती है और योगी अनुभव करता है कि—

सोऽहं ममायं विभव इत्येवं परिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता।।

* * * * * * *

स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः।
विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहितः ।।[३]

ऐसे योगियों के लिये जगत् परमात्मा की एक क्रीडा है।

जीवन्मुक्ति का स्वरूप—भट्टकल्लट स्पन्दकारिका में कहते हैं कि जगत् जुगुप्सा,

---

१. सोमानन्द—शिवदृष्टि २. शिवदृष्टि ३. उत्पलदेव—प्रत्यभिज्ञाकारिका

त्याग या अवसाद का विषय नहीं है। यह योगियों के लिये केवल एक क्रीड़ा है और उनकी यही अनुभूति जीवन्मुक्ति है—

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
स पश्यन् सर्वतो युक्तो जीवन्मुक्तो न संशयः।।[1]

इसी धरातल पर तन्त्रराजतन्त्र में कहा गया था कि देवता किसी बाह्य लोक का निवासी नहीं है, वह तो अत्यासन्न है।

तन्त्रराजतन्त्रकार की दृष्टि—देवता का सन्धान बाहर करना व्यर्थ है; क्योंकि—

स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा।

इसीलिये सनत्कुमारसंहिता में कहा गया है कि बाह्य पूजा यथार्थतः पूजा ही नहीं है; अतः बाह्य पूजा करनी ही नहीं चाहिये।

सनत्कुमारसंहिताकार की दृष्टि—सनत्कुमारसंहिताकार कहते हैं—

बाह्यपूजा न कर्तव्या कर्तव्या बाह्यजातिभिः।
सा क्षुद्रफलदा नृणां ऐहिकार्थैकसाधनम्।।

बाह्य पूजा प्रापञ्चिक लाभमात्र के लिये होने के कारण क्षुद्रफला है।

शंकराचार्य की दृष्टि (यथार्थ पूजा का स्वरूप)—

जपो जल्पः शिल्पं सकलमपि मुद्रा विरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्।।[2]

अर्चना का रहस्य

अथार्चनारहस्यस्योन्मीलितत्वात् क्रमेणार्च्यदेवताचक्ररहस्यमप्युद्भावयितु-मादावुद्देशमुपन्यस्यति—

सिरिपीठपञ्चवाहअणेत्तत्तअविन्दचक्कए मरह।
मरह अ गुरुणं पन्तिं पञ्च अ सत्तीओ सिट्ठिपमुहाओ ॥३६॥

(श्रीपीठपञ्चवाहनेत्रत्रयवृन्दचक्राणि स्मरत।
स्मरत च गुरूणां पङ्क्तिं पञ्च च शक्तीः सृष्टिप्रमुखाः।।)

श्रीपीठ, पाँच महाशक्तियाँ (पञ्चवाह), नेत्रत्रय एवं वृन्दचक्र का चिन्तन करना चाहिये तथा गुरुमण्डल एवं पाँच प्रमुख शक्तियों (सृष्टि, स्थिति, संहार, अनाख्या एवं भासा) का चिन्तन करना चाहिये।।३६।।

---

१. स्पन्दकारिका (३०) २. सौन्दर्यलहरी (२७)

श्रीपीठं पञ्चवाहो नेत्रत्रयं वृन्दचक्रमिति यानि चक्राणि तानि स्मरत परामृशत। यत्प्राधान्येनैषामावर्जनीयतया परामर्शः, तां श्रीगुरुनाथानां पङ्क्तिं च स्मरत। गुरुमण्डलप्राधान्यद्योतनाय पुनरपि स्मरतेत्युक्तम्। सृष्टिप्रमुखाः पञ्च शक्तीश्च स्मरत, या सृष्टिः स्थितिः संहारोऽनाख्या भासेति भिद्यन्ते। श्रीपीठेति तस्य पूज्यतोत्कर्षेण महत्त्वं द्योत्यते। महत्त्वं च तदोड्याणादीनामवान्तरपीठत्वेऽपि सर्वप्रतिष्ठाभूमितया प्रधानपीठत्वात्। इयं चाल्पैरेवाक्षरैर्मन्त्रबीजवदनेकार्थोपपादनसमर्था तत्तच्चक्रक्रमानुक्रमणिकारहस्योपदर्शिनी वक्ष्यमाणसर्वदेवताविकल्पसंग्रहप्राधान्यादुद्देशलक्षणा गाथा। यथेयमकृत्रिमा महाम्नायोक्तिः—

यत्पीठचक्रार्चितपञ्चवाहप्रकाशमानन्दखमूर्तिचक्रम्।
अष्टाष्टचक्रं प्रविराजते तद् गुरुक्रमौघं सचतुष्टयार्थः।। इति।

स्मरत, स्मरत—गुरुमण्डल का प्राधान्य प्रदर्शित करने हेतु गाथा में स्मरत (स्मरण करो) शब्द की द्विरुक्ति की गई है।

पीठ = पीठों में तो ओड्याण पीठ आदि अनेक पीठ हैं; किन्तु वे सभी पीठ श्रीपीठ की तुलना में उनके समकक्ष (समतुल्य) नहीं हैं।

परमेश्वर की स्फुरणधारायें ही पाँच महाशक्तियाँ हैं और वे ही 'पञ्चवाह' कही गई हैं।

इस गाथा में कहा गया है कि श्रीपीठ, पञ्चवाह, नेत्रत्रय, वृन्दचक्र आदि जो चक्र हैं, उनका सतत परामर्शन करते रहना चाहिये। श्रीगुरुनाथों की भी पंक्ति का स्मरण करते रहना चाहिये। गुरुमण्डल का प्राधान्य प्रदर्शित करने के लिये स्मरत-स्मरत दो बार कहा गया है।

सृष्टि में पाँच शक्तियाँ प्रधान हैं, उनका भी स्मरण करते रहना चाहिये।

पाँच शक्तियाँ—

१. सृष्टि	३. संहार	५. भासा
२. स्थिति	४. अनाख्या	

ओड्याण आदि अन्य पीठ श्रीपीठ के समतुल्य महत्त्व नहीं रखते। महाम्नाय में कहा गया है—

यत्पीठचक्रार्चितपञ्चवाहप्रकाशमानन्दखमूर्तिचक्रम् ।
अष्टाष्टचक्रं प्रविराजते तद् गुरुक्रमौघं सचतुष्टयार्थः।।

भासा शक्ति—महेश्वरानन्द जी ने गाथाक्रमाङ्क ४१ में कहा है कि सृष्टि की पाँचवीं कला भासा है। इसमें क्रम का नियम नहीं है। भासा तो सृष्टि का मूल कन्द है। भासा का पल्लव—प्रारम्भिक स्फुरण ही सृष्टि का आरम्भ है—

सृष्टेः पञ्चम कला भासेति जनो गणयति व्यवधानम्।
सृष्टेर्मूलकन्दो भासा भासायाः पल्लवः सृष्टिः।।[१]

एकमात्र एवं कलाओं से अतीत परमेश्वर की सर्वानुग्रहमयी, सर्वोत्तीर्ण एवं सर्वमयी भासा शक्ति में विकल्प स्फुरित नहीं होता। यदि प्रतिबिम्बगत कोई शक्ति स्फुरित होती है तो वह कोई विशिष्ट और षोडश विकारातीत सत्रहवीं शक्तिमात्र है—

भासायां न विकल्पः स्फुरति निष्कलश्रियाम्।
यदि प्रतिबिम्बतया स्फुरति परं षोडशाधिका देवी।।

यहाँ स्थूल-सूक्ष्म के परस्पर विरोधी तत्त्वों के सामरस्य से उन्मेष-निमेष की अवस्थायें भी संकेतित हैं, जिन्हें स्पन्दकारिका में शिव की शक्तियों का स्फार और जगत् के प्रलयोदय का कारण कहा गया है—उन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ।

यहाँ परा-मृश्यमान कौन है? महेश्वरानन्द कहते हैं—स्थूलसूक्ष्मत्वाद्यन्योन्यविरुद्धसामरस्योन्मेषा-स्पदतया तत्तदौत्तराम्नायोद्घोषितत्वेन परामृश्यमान इति यावत्। इस प्रकार इस गाथा में भी उपायत्रय का उपपादन किया गया है।

यहाँ (इस गाथा में) अभिधेय तो आणवोपाय है; किन्तु व्यंग्य रूप में शाक्तोपाय एवं शाम्भवोपाय दोनों संकेतित हैं। व्यञ्जना है क्या? व्यञ्जनं च नाम शब्दस्य कश्चिदभिधातात्पर्यलक्षणात्मकप्रसिद्धप्रस्थानातिक्रान्तो व्यापारोऽस्ति। जिस प्रकार आत्मा का या अपना शयन, आसन, भोजन आदि के अतिरिक्त स्वातन्त्र्य नामक लोकोत्तर स्वभाव भी है—यद्वदात्मनः शयनासनभोजनादिव्यतिरिक्तः स्वातन्त्र्यनामा लोकोत्तरः कश्चित् स्वभावः। काव्यालोक में कहा भी गया है—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु।।

परमशिव के स्वरूपामृतपान का अमित प्रभाव

अथ शाक्तमभिव्यनक्ति—

जे कुलकुम्भसुहासवपाणमहूसवसुहे पअट्टन्ति।
ते खु विअप्पङ्कुरए रसिआ उवदंसिउं पअब्भन्ति ॥५८॥

(ये कुलकुम्भसुधासवपानमहोत्सवसुखे प्रवर्तन्ते।
ते खलु विकल्पाङ्कुरान् रसिका उपदंष्टुं प्रगल्भन्ते।।)

जो साधक परमशिव के स्वरूपामृत-कुम्भ के रसास्वादन के महोत्सवरूप आनन्द में मग्न रहते हैं, वे स्वरूपामृतरसिक निःसन्देह (विश्ववैचित्र्याख्याक) विकल्प (विश्वप्रपञ्च) के अंकुरों को विनष्ट करने में पूर्णतः समर्थ हो जाते हैं।।५८।।

ये देशिककटाक्षपातपूतचेतसो महापुरुषाः कुलस्य षडध्वस्फारात्मनो वेद्योल्लासस्य यः कुम्भः स्वानन्दस्वभावतया कुम्भयत्यव्याकुलमवस्थापयतीति व्युत्पत्त्या प्रतिष्ठाहेतुराधारविशेषः, तत्रत्यो यो लौकिकालौकिकमाधुर्यसामरस्यास्पदत्वादमृतशब्दवाच्य आसवो भैरवीयं द्रव्यम्, तस्य यत् पानमात्मैश्वर्यप्रधानतापरामर्शपूर्वको निर्विशङ्कस्वीकारः स एव महान् मखरूपोऽध्वरात्मा चोत्सवः स्वाह्लादसाक्षात्कारसम्पत्सौभाग्यम् तस्मिन् विषये प्रवर्तन्ते वेद्यवेदकभावादिविकल्पविगलनलक्षणप्रकर्षपूर्वकं व्याप्रियन्ते, खलुर्हेतौ, ते तत एव हेतोः पाशवशैवादिविचित्रकल्पनामयान्—

अपीत्वाऽपि भवद्भक्तिसुधामनवलोक्य च ।
त्वामीश! त्वत्समाचारमात्रात् सिध्यन्ति जन्तवः ।।

इति श्रीमत्स्तोत्रावलीस्थित्या संस्कारशेषतामात्रानुप्राणनान् भेदप्रथाविलासान् उपदंष्टुमत्यन्तसामीप्यरूपस्वात्मतादात्म्यापादनयुक्त्या पुनरुत्पत्तिशून्यतौचित्येन चर्वयितुं प्रगल्भन्ते प्रकृष्टं स्थैर्यमनुभवन्ति। यतोऽमी रसिकाः 'रसो वै सः' इत्यादि-श्रुत्युपपादितं रसं स्वकीयतयाऽनुभवन्ति। अयमेव हि मुख्यया वृत्त्या रस इत्युच्यते। यदुपचारेण माधुर्यप्रीतिशृङ्गारादयोऽप्येवं व्यपदिश्यन्ते। यत्तात्पर्येण च 'स वा एष पुरुषोऽन्नरसमयः' इत्युपनिषदुन्मिषति। अन्यथा रसशब्दप्रयोगस्य नैरर्थक्य-प्रसङ्गात्। सुधेत्यासव इति च शब्दद्वयोपादानेन पाशवं शैवमिति स्वभावभेदः, विधिनिषेध इति चोदनावैचित्र्यम्, लौकिकमलौकिकमिति व्यवहारतारतम्यम्, गोप्यमगोप्यमिति भावविभागः, श्रद्धा जुगुप्सेत्यवस्थाविवेकः, आमुष्मिकमैहिक-मिति फलविशेषः, देवा असुरा इति देवताव्यवस्था चेति लोकयात्रानुबन्धी सर्वो-ऽपि विरोध एतदास्वादनधन्यानां न किञ्चिदपि शङ्कातङ्कमङ्कुरयितुमलमित्युन्मी-ल्यते। यतो ब्राह्मणचाण्डालादिव्यवस्थापरित्यागेन—

घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं जातिश्च शीलं चेत्यष्टौ पाशाः प्रकीर्तिताः ।।

इति स्थित्या वर्णाश्रमादिनैयत्यादिना परिस्फुरन् सर्वोऽपि पाशप्ररोहः स्व-हृदयसंवादसौन्दर्योत्तरं स्वत एवापहीयते। अत्र च ये सौत्रामण्यादिदृष्टान्तदृष्ट्या प्रामाण्यं प्रसाधयन्ति, नूनं ते हिंसावलोकितकेन विगलितमपि तज्जिह्मं ब्राह्मण्य-मालोकयन्ति। अस्माकं पुनरुल्लङ्घिताशेषसंशयशैलशृङ्गाणाम्—

धन्याः केचिद्धनमिव विभोरागमैर्गोप्यमानां
व्याकुर्वाणां जगदपरथा वीरविक्रान्तिविद्याम् ।
माधुर्यस्य प्रथमपदवीं मङ्गलानां प्रतिष्ठां
मान्त्रीं शक्तिं मनसि महती देवतेत्याद्रियन्ते ।।

इति संविदुल्लासन्यायादेकशरणानां न कदाचिदत्राप्रामाण्यशङ्का प्रामाण्य-प्रसाधनापेक्षा वेत्यलमारुरुक्षुजनहृदयपरीक्षणव्याक्षेपेण। उक्तरूपमलौकिकमर्थम-भिप्रेत्य हि शिवधर्मादिषु—

आगमत्वेऽपि सामान्ये कः प्रद्वेषः शिवागमे ।
अनायासेन यत्रोक्ता मुक्तिरेकेन जन्मना ।।

इत्याद्युपपाद्यते। प्रस्तावश्चायं 'अग्घं वेज्जविलासो, पुण्णाहन्ताण मुहे' इत्यत्र विस्तीर्य पर्यालोचितः। अयं चोपायः स्वीक्रियमाणस्यास्य द्रव्यविशेषस्य विश्ववेद्य-

विलासात्मकतयाऽवस्थापितस्य 'शक्तयोऽस्य जगत् सर्वम्' इति स्थित्या सर्व-शक्तिसामरस्यरूपतया निर्णीतत्वाद् अन्यसमयाचारादनुत्तराचारं प्रति तदास्वाद-नस्य स्फुरत्तापरपर्यायशक्तिस्वभावतयाऽनुभूयमानत्वाच्च शाक्त इत्युक्तः। पर्यन्त-दृष्ट्या पुनरुपपादितद्रव्यस्वीकारसाध्यस्याह्लादोत्कर्षानुभूतिचमत्कारस्य स्वस्व-भावात्मकतयाऽनुभूयमानत्वाच्छाम्भव एवेत्यवगन्तव्यम्। यतोऽयं 'पामरप्रवृत्तिः प्रमाणम्' इति राजभैरवसूत्रस्थित्या पुंसां स्वतःप्रवृत्तिविषयतयोपलभ्यते। यतश्च श्रीविज्ञानोद्योते—

जग्धिपानरसोल्लासरसानन्दविजृम्भणात् ।
भावयेद् भरितावस्थां महानन्दमयो भवेत् ।।

इत्यत्र श्रीविज्ञानभट्टारकांशे एषा शाम्भवी भूतिरिति श्रीमत्क्षेमराजेन व्या-ख्यातम्। उपलक्षणं चैतत्। तेन विषयपञ्चकास्वादसौख्ये सर्वत्राप्ययमेव न्यायः। यथा विषयपञ्चिकायाम्—

मधुरसरसवीणावेणुगीतादिवाद्य-
श्रवणाजनितहर्षः शब्दमात्रैकशेषः ।
तदनु भवविरामप्रस्फुरद्बोधमूर्ति-
र्भवविभवविमुक्तो मुक्तिमाप्नोति सम्यक् ।।

इत्यादि। यथा च मदीये संविदुल्लासे—

पुष्पोपहारघनचन्दनवंशताल-
नृत्तप्रयोगमधुमुग्धवधूप्रधानाः ।
भावाः सहस्रमपि जाग्रतु तत्तदन्तः-
प्रह्लादिनी विजयते परचित्कलैका ।। इति।

तेषु च शाक्तशाम्भवत्वादिकं तत्तत्प्रकरणादिनाऽवगन्तव्यम्। यथा च श्रीविज्ञानोद्योते एकमेव प्रियजनोपभोगलक्षणमर्थमवलम्ब्य—

शक्तिसङ्गमसंक्षुब्धशक्त्यावेशावसानिकम् ।
यत् सुखं ब्रह्मतत्त्वस्य तत् सुखं स्वाक्यमुच्यते ।।

इत्यत्राणवत्वम्,

लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात् स्मृतेः ।
शक्त्यभावेऽपि देवेशि! भवेदानन्दसम्प्लवः ।।

इत्यत्र शाक्तत्वम्,

आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात् ।
आनन्दमुद्गतं ध्यात्वा तल्लक्ष्यस्तन्मयो भवेत् ।।

इत्यत्र शाम्भवत्वं च पर्यालोचितमिति ।।५८।।

यहाँ कुल का अर्थ है—विश्वव्यापक शिव। कुलामृत के रसपान से जीव पशुभाव से मुक्त होकर शिवस्वरूप हो जाता है। शिवस्वरूपिणी उपासना का यही फल है। विश्वप्रपञ्च के अंकुरों का नाश करने की दिशा में कुलरूपी कुम्भ में स्थित शिव-स्वरूपरूपी सुधा के आसव का आस्वादन ही साधकों को (विश्वप्रपञ्च के अंकुरों को उन्मूलित करने में) सामर्थ्य प्रदान करता है।

कुलस्य = षडध्वस्फारात्मक वेद्योल्लास के। कुम्भ = यः कुम्भः स्वानन्दभावतया कुम्भयत्यव्याकुलमवस्थापयतीति व्युत्पत्त्या प्रतिष्ठाहेतुराधारविशेषः। आसव = भैरवीय द्रव्य। पान = आत्मैश्वर्यप्रधानतापरामर्शपूर्वको निर्विशङ्कस्वीकार। मख = यह स्वीकृतिरूप मख ही उत्सव है। उत्सव = स्वाह्लाद-साक्षात्कार-सम्पत्सौभाग्य। प्रवर्तन्ते = उन विषयों में वेद्य-वेदकभावादि विकल्पविगलनलक्षण प्रकर्षपूर्वक प्रवृत्त होते हैं। खलु = निश्चित रूप से। के कारण।

श्रीमत्स्तोत्रावली में कहा गया है—

अपीत्वाऽपि भवद्भक्तिसुधामनवलोक्य च।
त्वामीश! त्वत्समाचारमात्रात् सिध्यन्ति जन्तवः।।

रसिका = रसो वै सः इत्यादि श्रुत्युपपादित रस के आस्वादक। यही मुख्य रस है। माधुर्य-प्रीति-शृंगार आदि भी रस हैं। इसी कारण कहा गया है—स वा एष पुरुषोऽन्नरसमयः।

अष्टपाश भी विकल्प हैं; जो निम्नाङ्कित हैं—

घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं जातिश्च शीलं चेत्यष्टौ पाशाः प्रकीर्तिताः।।

विज्ञानोद्योत में कहा है कि—

जग्धिपानरसोल्लासरसानन्दविजृम्भणात् ।
भावयेद् भरितावस्थां महानन्दमयो भवेत्।।

पञ्चशिका में कहा गया है कि—

मधुरसरसवीणावेणुगीतादिवाद्यश्रवणजनितहर्षः शब्दमात्रैकशेषः।
तदनु भवविरामप्रस्फुरद्बोधमूर्तिर्भवविभवविमुक्तो मुक्तिमाप्नोति सम्यक्।।

संविदुल्लास में कहा गया है कि—

पुष्पोपहारघनचन्दनवंशतालनृत्तप्रयोगमधुमुग्धवधूप्रधानाः ।
भावाः सहस्रमपि जाग्रतु तत्तदन्तः प्रह्लादिनी विजयते परचित्कलैका।।

आणवत्व—

लेहनामन्थनाकोटैः स्त्रीमुखस्य भरात् स्मृतेः।
शक्त्यभावेऽपि देवेशि! भवेदानन्दसम्भवः।।

शाक्तत्व—

आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात्।
आनन्दमुद्गतं ध्यात्वा तल्लक्ष्यस्तन्मयो भवेत्।।

जो रसिक (रसतत्त्व के अनुसन्धायक या रसमग्न) हैं, वे ही रसविहीन विकल्पों का त्याग करके रसतम परमात्मा में लीन होते हैं। इन्हीं के विषय में कहा गया है कि—ते खलु विकल्पाङ्कुरान् रसिका उपदंष्टुं प्रगल्भन्ते।

इस रस (आनन्द) की स्थिति में—

आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात्।
आनन्दमुद्गतं ध्यात्वा तल्लक्ष्यस्तन्मयो भवेत्।।

यही ब्रह्मतत्त्वात्मक सुख ही स्वाक्य कहलाता है—

शक्तिसङ्गमसंक्षुब्धशक्त्यावेशावसानिकम् ।
यत् सुखं ब्रह्मतत्त्वस्य तत् सुखं स्वाक्यमुच्यते।।

दर्पणरूप परमात्मा में प्रतिबिम्बस्वरूप जगत्

अथ शाम्भवमुपदिशति—

हन्त मुहं पडिबिम्बउ पडिबिम्बेउ तह तं पि अद्दाओ।
अद्दाओ उण जस्सिं पडिबिम्बइ सो वि णाअव्वो ॥५९॥

(हन्त मुखं प्रतिबिम्बतु प्रतिबिम्बयतु तथा तदपि दर्पणः।
दर्पणः पुनर्यस्मिन् प्रतिबिम्बति सोऽपि ज्ञातव्यः।।)

सखेद कहना पड़ता है कि यद्यपि दर्पण में मुख प्रतिबिम्बित हो, दर्पण उसे प्रतिबिम्बित करे तथापि जिसमें दर्पण प्रतिबिम्बित होता है, वह भी ज्ञातव्य है।।५९।।

लोके हि दर्पणादौ स्वच्छे वस्तुन्याभिमुख्येनोल्लसन्नाननादिः पदार्थः प्रतिफलनयुक्त्या परिस्फुरतीत्यतिप्रसिद्धोऽयमर्थः। तत्र दर्पणवदनादीनां वास्तवं वपुरत्रैवानन्तरमुपपादयिष्यते। स्थूलया तु दृष्ट्या मुखतयाऽभिमतो भावः प्रतिबिम्बनक्रियामनुभवति। आदर्शात्मकश्च तदाधारतया तत्प्रयोजको भवतीत्यस्तु नामैतत्। यः पुनरयमादर्शः स्वच्छतावशादाननादिप्रतिबिम्बस्थलतयाऽनुभूयते, स एव यस्मिन्नत्यन्तस्वच्छे स्वात्मनि तादृग्रूपतया प्रतिबिम्बति सोऽपि ज्ञातव्यः, यन्मयोऽयमशेषप्रतिबिम्बनप्रागल्भ्योन्मेषः। ज्ञातव्य इति ज्ञानार्हः शक्यज्ञानो वाऽ-

वश्यं ज्ञेय इति वा प्रैषातिसर्गादिर्वा विनेयजनाभिमुखीकाराय बहुप्रकारः कृत्य-प्रत्ययार्थोऽनुसन्धेयः। प्रतिबिम्बत्वित्यादौ कामचारकरणात्मन्यामन्त्रणे लोट्। हन्तेत्यनेन बिम्बप्रतिबिम्बस्वभावावबोधवन्ध्यानन्यसैद्धान्तिकान् प्रत्यनुकम्पा द्योत्यते। तेन च सर्वोऽयमादर्शाननाद्युपलक्षितः स्तम्भकुम्भादिर्वेद्यविस्तारो मालिन्यकक्ष्यानुप्रवेशितान्यपदार्थवैमल्ये स्वच्छत्वोत्कर्षशालिनि स्वस्वभावाविभिन्न-परमेश्वरात्मके महति मुकुरमण्डले तन्मयत्वपर्यायया प्रतिबिम्बनयुक्त्या परिस्फुरतीति तात्पर्यार्थः। उपलक्षणं चैतत्। तेन—

शब्दो नभसि चानन्दस्पर्शधामनि सुन्दरः।
स्पर्शोऽन्योऽपि दृढाघातशूलशीतादिकोद्भवः।
परस्थः प्रतिबिम्बत्वात् स्वदेहोद्भूननाकरः।
एवं घ्राणान्तरे गन्धो रसो दन्तोदके स्फुटः।।

इति श्रीतन्त्रालोकस्थित्या वियति प्रतिश्रुत्कात्मा शब्दः, अङ्गनानुस्मृत्यादावाधारचक्रे प्रत्यासन्नकर्कशस्पर्शानुसन्धानात् सौकुमार्यशालिनां शरीरेषु स्पर्शः, अन्यजनास्वाद्यमानतिन्तिण्याद्यनुसन्धानाद् दन्तोदके रसः, चन्दनादिधूपनावस्थायां घ्राणान्तराले गन्धः, स्मरणोत्प्रेक्षादावात्ममनस्यन्यजनानुभूयमानस्वभावो हर्षशोकाविर्भावश्चेति सार्वत्रिकमेतत् प्रतिबिम्बसम्पत्सौभाग्यम्। एवञ्च बाह्येषु दर्पणादिषु बिम्बसव्यपेक्षः प्रतिबिम्बोपलम्भः। स्वात्मरूपे पुनरेतद्वैपरीत्यम्, अशेषस्यापि विश्ववैचित्र्यस्य प्रतिबिम्बतयाऽनुभूयमानत्वात्। यथा श्रीतन्त्रालोके—

प्रतिबिम्बं च बिम्बेन बाह्यस्थेन समर्प्यते।
तस्यैव प्रतिबिम्बत्वे किं बिम्बमवशिष्यताम्।। इति।

तथा च श्रीचिद्गगनचन्द्रिकायाम्—

वह्निवारिमुकुरादिषु स्फुटं स्वच्छवस्तुषु कुमारि बिम्बता।
मन्त्रिता सह परिच्छदेन यत्तेन बिम्बमनवेक्षितं तव।। इति।

अलौकिकी चेयं प्रतिबिम्बयुक्तिः शाम्भव एवोपाये पर्यवस्यति। यदाहुः—

मत्त एवोदितमिदं मय्येव प्रतिबिम्बितम्।
मदभिन्नं जगच्चेति त्रिधोपायस्तु शाम्भवः।। इति।

यथा श्रीतन्त्रवटधानिकायाम्—

यथादर्शे घटादीनां स्थितिर्मिश्रेतरात्मिका।
मदात्मनि तथाऽमीषां भावानां चित्ररूपिणी।। इति।

एतदेव विश्वप्रतिबिम्बनक्षमत्वं परमेश्वरस्य तदतिशयितं स्वातन्त्र्यमुच्यते

यदन्तर्विद्धिरालोचनीयम्। विश्वस्य च प्रकाशस्वरूपे परमेश्वरे परिस्फुरतः प्रतिबिम्ब-प्रक्रियामेनामन्तरेण नान्या रीतिरौचित्यमनुभवति। नन्वस्ति विवर्तः परिणामादिर्वेति चेत्? न। विवर्तो नाम भ्रान्त्यपरपर्यायमन्यस्यान्यत्रारोपणात्मकं ज्ञानमुच्यते। तथा च विश्वमात्मन्यात्मा वा विश्वस्मिन्नारोप्यत इत्यङ्गीकार्यम्। तत्र प्रथमे पक्षे यथा सर्पे दृष्टं सर्पत्वं रज्ज्वामारोप्यते, एवमन्यत्र कुत्र दृष्टमिति कृत्वा विश्वमात्मन्या-रोप्येत। किञ्च नायं सर्प इतिवन्नेदं विश्वमित्यौत्तरकालिको बाधोऽप्यत्र नानुभूयते। युक्त्या तत्र बाधः प्रसाधयिष्यत इति चेत्? न। केयं युक्तिर्नाम? तर्को वा प्रमाणं वा स्यात्। नाद्यः, तस्याहार्यमूलतया प्रमाणानुग्राहकत्वव्यतिरेकेण स्वातन्त्र्येणार्थ-प्रसाधकतयाऽनभ्युपगतत्वात्। न द्वितीयः, प्रमाणं च किं प्रत्यक्षमुतागमः, आहो-स्विदनुमानम्। न प्रथमः, प्रत्यक्षेण तद्बाधस्य न केनचिदुपलभ्यमानत्वात्। प्रत्युत विश्वव्यवहारस्यार्थक्रियादिना निर्बाधं प्रवर्त्यमानत्वाच्च। न द्वितीयः, आगमो हि 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन' इत्यादि। तस्य चायमर्थः— ब्रह्मणस्तावदात्मस्वरूपपरमेश्वराविभिन्नस्य न केनचिदप्याकारेण भेदप्रथौचित्य-मस्ति। इयत्तु चिन्त्यम्—तत्र परिस्फुरतः प्रपञ्चस्य स्थितिः कीदृशीति? अत्रैव-माचक्ष्महे—इह वाग्व्यवहारानुकूलं प्रस्तावादिदन्तयाऽध्यवसीयमाने ब्रह्मणि गगनपवनादिः सर्वोऽयं प्रपञ्चो नाना न भवति। भेदप्रथास्पदं न सम्पद्यते। किं तर्हि, उपपादितया तत्स्वातन्त्र्यमय्या प्रतिबिम्बदृष्ट्या ब्रह्मस्वरूपमेवाविभिन्न-मध्यक्ष्यत इति। अन्यथा 'नेह सत्यमस्ति किञ्चन' इति श्रूयेत, शून्यवादो वा प्रसज्येत। नापि तृतीयः, उक्तेनैवागमेन विगीतं मिथ्या दृश्यत्वात् शुक्तिरजतवदि-त्यादेर्लिङ्गस्य कालातिक्रान्तत्वात्। एवमसिद्ध्याद्यप्यूह्यम्। ग्रन्थगौरवभयात् तु तन्न वितन्यते। अपि च, ब्रह्मण्ययं प्रपञ्चः केन प्रमात्राऽध्यारोप्यते। तेनैव ब्रह्मणेति चेत् तर्ह्यनधिष्ठानभ्रमत्वप्रसङ्गः, तस्यारोपकतया स्वीकृतत्वात्। अंशतोऽस्य तदु-भयार्थनिर्वाहकत्वमिति चेत्? न। तथापि तस्य भ्रान्तिमत्त्वप्रसङ्गात्। अस्तु तर्हि जीवात्मनोऽध्यारोपकत्वं ब्रह्मणश्चाधिष्ठानत्वमिति चेत्? न। भेदवादस्यानभि-मतत्वात्, अंशत आत्माश्रयत्वावश्यम्भावाच्च। ननु काल्पनिको भेदः स्वैरं स्वी-क्रियत इति चेत्? न। तस्यैव विवर्तशब्देनाभिधातुमुपक्रान्तत्वात्। किञ्च, कीदृशेन सादृश्येन ब्रह्मणि प्रपञ्च आरोप्यते। तदुपेक्षायां च कथं नातिप्रसङ्गः। ब्रह्मप्रपञ्चयोश्च सत्यासत्यादिविभागवशाद् वैसादृश्यमतिप्रसिद्धम्। विश्वस्मिन् ब्रह्मारोप्यत इति तु प(क्षः?क्षोऽ)प्रसिद्धो मर्यादातिक्रान्तत्वाद् ब्रह्मणो मिथ्यात्वप्रसङ्गाच्चात्यन्त-तुच्छतया निश्चेतव्यः। अतश्च वैचित्र्येणोक्तप्रकारप्रतिबिम्बनस्वभावेन वर्तनं विश्वस्य विवर्त इति व्याख्यायां न किञ्चिदनौचित्यम्। यथा श्रीक्रमकेलौ—

तद्विवर्तः स्मृतौ रश्मिपुञ्जश्चक्रेशिपूर्वकः(?)।

इत्यत्र व्याख्यातम्—'विवर्तो विचित्रेण रूपेण वर्तनं न त्वविद्यावशात्, अपि तु स्वातन्त्र्यतः इति। एतेन प्रसिद्धसत्त्वासत्त्वताटस्थ्यशालिन्या संवित्स्वान्त्र्यमय्या महासत्तया विश्वव्यवहारस्य निर्वचनीयत्वनैयत्यादेतद्विपर्ययात्मा तस्यानिर्वचनीयत्वपक्षोऽप्यपहस्तित एव स्यात्। एवं परिणामेऽपि वाच्यम्। परिणामो हि क्षीरादेः पूर्वाकारविनाशाद् दध्यादिरूपतत्सदृशाऽन्याकारपरिग्रहः। तत्रापि किं ब्रह्म विश्वतया परिणमति, उत विश्वं ब्रह्मतयेति प्रष्टव्यम्। नाद्यः, ब्रह्मणः स्वरूपनाशप्रसङ्गात्। न द्वितीयः, विश्वस्य सच्चिदानन्दादिस्वभावत्वापत्तेः। तदभ्युपगमे ब्रह्मणः सकाशाद् विश्वस्य सर्वाकारवैषम्यात्, परिणामवार्तानुपपत्तेश्च। एवं वृक्षत्वशिंशपात्वादिवल्लौकिकस्तादात्म्यपक्षोऽपि प्रतिक्षिप्तोऽवगन्तव्यः। नन्वेवं प्रतिबिम्बवादेऽपि मिथ्यात्वशङ्काया अपरिहार्यत्वम्। तत्र हि स्वच्छेन दर्पणादिद्रव्येण प्रतिहता लोचनमरीचयः परावृत्त्य स्वमात्मानं गृह्णन्तीति प्रसिद्ध्या दर्पणे पुरुष इति प्रतीतिर्भ्रान्तिरित्यवधार्यते। तद् दर्पणे पुरुषो नास्तीत्यौत्तरकालिको बाध एव प्रगल्भत इति चेत्? न। पारमेश्वरी हि प्रतिबिम्बभङ्गिरलौकिकत्वादनवद्यामेव कक्ष्यामधिरोहति। यदमुष्यामुपन्यस्तया नीत्या बिम्बव्यपेक्षा नोत्पद्यते। तत्संभवे हि बिम्बान्वयव्यतिरेकानुविधायिनी प्रतिबिम्बस्फुरत्तेति मिथ्यात्वशङ्काया अवकाशः स्यात्। किञ्च, लौकिके दर्पणादावपि न मिथ्यात्वानुकूलो बाधोऽस्ति किमुतालौकिक इति ब्रूमः। ननूक्तमेव दर्पणे पुरुषो नास्तीति बाधोऽनूभूयत इति चेत्? न। दर्पणे यदि पुरुष आरोप्यते, तदा स तत्र नास्तीति बाधोऽपि स्यात्। नैवमनुभव(त?):। तत्र तच्छायामात्रस्यैवोपलम्भः, न तु तद्वतः पुंस इत्यनुभूयमानत्वात्। अतश्च दर्पणे पुरुषोऽस्तीति युक्तिमतां प्रतीत्यभावादेतद्बाधोऽपि नास्तीत्यर्थनि(क ? ष्क)र्षः स्यात्। न चार्थक्रियासद्भावेऽपि मित्यात्वस्यौचित्यम्। दृश्यते हि दर्पणाद्यवलोकिनां दन्तधावनादिरनेकोऽर्थक्रियाप्रकारः। शुक्तिकादीनां तु रजताद्यर्थक्रिया न क्वचिदपि सम्पद्यते। ननु प्रसिद्धसत्यमर्यादातिक्रान्तः खल्वयं प्रतिबिम्बप्रकार इति चेत्? न, प्रसिद्धाप्रसिद्धमर्यादातिक्रान्तः खल्वित्यपि वक्तुं शक्यत्वात्। ननु तर्हि सत्यासत्यव्यतिरिक्ता तृतीया कोटिरित्यापततीति चेत्? सत्यम्। तृतीया कोटिर्यदलौकिकमतिमहत् पारमेश्वरस्वातन्त्र्यमित्याक्रन्द्यते। यदानुगुण्येनोक्तं श्रीमत्स्तोत्रावल्याम्—

सदसत्त्वेन भावानां युक्तानां द्वितयी स्थितिः।
तामुल्लङ्घ्य तृतीयस्मै नमश्चित्राय शम्भवे ।। इति।

ननु बिम्बव्यतिरिक्तः प्रतिबिम्बयोगो न क्वचिदप्युपलभ्यत इति चेत्? सत्यम्। किं क्रियताम्। अत एव ह्येतत् पारमेश्वरं स्वातन्त्र्यमित्यसकृदाचक्ष्महे। ननु बिम्बमेवैतदस्त्विति चेत्? न। तल्लक्षणायोगात्। बिम्बं ह्यन्यसम्मिश्रणशून्यम्,

स्वतन्त्रमेव वस्त्वित्युपलभ्यमानत्वात्। यथा दर्पणानुपश्लिष्टं वदनादीति। यदुक्तं श्रीतन्त्रालोके—

ननु बिम्बस्य विरहे प्रतिबिम्बं कथं भवेत्।
किं कुर्मो दृश्यते तद्धि ननु तद्बिम्बमुच्यताम्।
नैवं तल्लक्षणाभावाद् बिम्बं किल किमुच्यते।
अन्यामिश्रं स्वतन्त्रं सद् भासमानं मुखं यथा।। इति।

नन्वेवं प्रतिबिम्बलक्षणस्याप्ययोग इति चेत्? न। तस्यैवं लक्ष्यमाणत्वात्। यथोक्तं तत्रैव—

अन्यव्यामिश्रणायोगात् तद्भेदाशक्यभासनम्।
प्रतिबिम्बमिति प्राहुर्दर्पणे वदनं यथा।।
बोधमिश्रमिदं बोधाद् भेदे वा शक्यभासनम्।
पुरतत्त्वादिबोधे किं प्रतिबिम्बं न भास्यते।। इति।

ननु सौगतसिद्धान्तसाधिताद् प्रतिबिम्बवादाद् युष्मदुपक्षिप्तस्य किं वैलक्षण्यमिति चेत्? उच्यते—तेषां हि वित्तौ वेद्यमेव प्रतिबिम्बति, न पुनर्वित्तिर्वेद्ये। अस्माकं तु 'सौगतस्यापि संविदि संवेद्यं प्रतिबिम्बमर्पयति, न तु संवेद्ये संवित्' इति श्रीप्रत्यभिज्ञाविवृतिविमर्शिनीस्थित्या वित्तौ वेद्यमिव वेद्ये च वित्तिः प्रतिबिम्बमुत्पादयति। यदेतदुभयमपि वेदितुः परमेश्वरस्य स्फुरणप्रकार इति स्वच्छत्वोत्कर्षं प्रति न किञ्चिद् वैषम्यमनुभवति। यद् वक्ष्यति—'अविआरोहअपासे' इत्यादौ। ततश्च यदुभयत्र प्रतिबिम्बति (य?त)द्विश्ववैचित्र्यमित्याख्यायते। यदुक्तं मयैव संविदुल्लासे—

आदर्शयोरिवान्योन्यं लम्भितप्रतिबिम्बयोः।
शिवशक्त्योरनन्ताः स्फुरन्तरन्तः प्रसक्तयः।। इति।

तत्रापि—

बोध्यमिश्रमिदं बोध्याद् भेदे वा शक्यभासनम्।
ज्ञानस्मृत्यादि बोध्ये किं प्रतिबिम्बं न भण्यते।।

इति समान एव न्यायः। तत्र च वेत्तरि वित्त्यात्मनि वेद्यस्य प्रतिबिम्बनम्, वेद्यात्मनि तु वित्तेरिति। सर्वथा तस्यैवं स्वातन्त्र्यसंरम्भाधीनो विश्वविक्षोभः। एवं सांख्यादिप्रतिबिम्बवादवैलक्षण्यमप्यूह्यमिति विवर्तादिव्यतिरेकेणास्मदुपक्षिप्तः प्रतिबिम्बपक्ष एव प्रौढमाढौकते। यदाहुः—

अतः प्रपञ्चस्य मृषात्ववादी कार्यत्ववादी प्रतिभेदवादी।
असत्यवादी च परेश! शम्भो! तव स्थितिं नेषदपि स्पृशन्ति।। इति।

प्रतिबिम्बत्वित्यनेनैतदासूत्र्यते यद् दर्पण इव वदनादि किं स्वात्मनि विश्वं प्रतिफलतीति दृष्टान्तदृष्ट्या विप्रतिपन्नो जनः प्रतिसमाधीयत इति। स्थूलोपदेशावधीरणेन—

स्वस्यैव स्फुरणं मुख्यं विश्वस्मिन्नधिरोप्यते।
ननु नौकाधिरूढस्य चलतीवापगातटम्॥

इति स्थित्या स्वात्मनि निष्ठं विश्वप्रतिबिम्बनक्रियावैदग्ध्यं मुख्यं स्फटिकमुकुरादावल्पनैर्मल्येऽपि वस्तुनि सादृश्येनोपचर्यते। अन्यथा हंस(नि?ति हिम)कर इत्यादिसाधारणस्योपमानार्थस्य क्विप्रत्ययस्य वैयर्थ्यप्रसङ्ग इति। यद्यपि प्रतिबिम्बतीत्याद्यौपम्यव्यतिरेकेणाप्यभियुक्ताः प्रयुञ्जते, तथापि तत्सौशब्द्यनिष्कर्षावस्थायामुक्तार्थावश्यम्भावः।

इति गुरुपदपरिचर्यातात्पर्यधनो महेश्वरानन्दः।
प्रतिबिम्बवादसम्पत्सौभाग्यं स्वहृदयार्थमाचख्यौ॥

अथ च सर्वोऽयमुपायप्रपञ्चस्तत्तत्परामर्शकक्ष्याविशेषारुरुक्षुजनापेक्षया पर्यालोचितः। पार्यन्तिक्यां पुनरारूढजनाधिरूढायां स्वस्वभावैकपारिशेष्यलक्षणायामवस्थायामुपायत्वमेव पर्यवस्यति। तद्व्यतिरेके पुनरुपायस्फुरत्ताया एवासंभवात्। यदुक्तं श्रीतन्त्रालोके—

यावानुपायो बाह्यः स्यादान्तरो वापि कश्चन।
स सर्वस्तन्मुखप्रेक्षी तत्रोपायत्वभाक् कथम्॥ इति।

श्रीतन्त्रवटधानिकायाञ्च—

उपयैर्न शिवो भाति भान्त्यमी तत्प्रसादतः।
स एवाह स्वप्रकाशो भासे विश्वस्वरूपकः॥ इति।

हन्त = दुःख की बात है। सखेद कहना पड़ता है कि व्यवहार-जगत् (लोक) में दर्पण आदि स्वच्छ वस्तु में वस्तु का आभिमुख्य होने पर उसके प्रतिफलन के रूप में उस वस्तु का प्रतिबिम्ब दृष्टिगत होता है।

आदर्श = दर्पण। दर्पण अत्यन्त स्वच्छता के कारण मुख आदि को प्रतिबिम्बित करता है, उसी प्रकार अत्यन्त स्वच्छ आत्मा में परमात्मा का भी प्रतिबिम्बन होना चाहिये। उसमें तो अशेष प्रतिबिम्बन प्रागल्भ्य की क्षमता है।[१] परमेश्वररूप अत्यन्त स्वच्छ एवं महान् दर्पण में सारा जगत् प्रतिबिम्बित है।

हन्त = दुःख की बात है। यह कथन अन्य सैद्धान्तिकों के प्रति अनुकम्पा या

१. महेश्वरानन्द (महार्थमञ्जरी)

दया दिखाने के लिये प्रयुक्त किया गया है। अन्य दार्शनिक जगत् एवं परमात्मा में बिम्बप्रतिबिम्बवाद के सिद्धान्त को स्वीकार करते हैं; किन्तु शैव (त्रिकदार्शनिक) आभासवाद एवं स्वातन्त्र्यवाद का सिद्धान्त मानते हैं। यहाँ (क) मुकुर, (ख) बिम्ब, (ग) प्रतिबिम्ब पृथक्-पृथक् है नहीं।

तन्त्रालोककार की दृष्टि—उक्त प्रसंग को आगे बढ़ाते हुये अभिनवगुप्त तन्त्रालोक में कहते हैं—

शब्दो नभसि चानन्दस्पर्शधामनि सुन्दरः।
स्पर्शोऽन्योऽपि दृढ़ाघातशूलशीतादिकोद्भवः।।
परस्थः प्रतिबिम्बत्वात् स्वदेहोद्धूननाकरः।
एवं घ्राणान्तरे गन्धो रसो दन्तोदके स्फुटे।।

आकाश में शब्द, जल में रस, पृथ्वी एवं नासिका में गन्ध, वायु एवं त्वगन्धोन्द्रिय में स्पर्श, अग्नि एवं चक्षुरिन्द्रिय में रूप की अनुभूति होती है। यहाँ भी बिम्ब-प्रतिबिम्ब की स्थिति है।

बाह्य पदार्थों के धरातल पर तो बिम्ब एवं प्रतिबिम्ब परस्पराश्रित पृथक्-पृथक् पदार्थ हैं। सूर्य (बिम्ब), जल = दर्पण स्थानीय प्रतिबिम्बग्राही आधार, प्रतिबिम्ब = सूर्यरूप बिम्ब का प्रतिफलन। द्रष्टा = प्रतिबिम्ब द्रष्टा प्रमाता। ये सभी पृथक् सत्तायें हैं; किन्तु आध्यात्मिक जगत् में ये पृथक्-पृथक् नहीं हैं। यहाँ वैपरीत्य है—बाह्येषु दर्पणादिषु बिम्बसव्यपेक्षः प्रतिबिम्बोपलम्भः। स्वात्मरूपे पुनरेतद्वैपरीत्यम्। आचार्य अभिनवगुप्तपाद कहते हैं—

प्रतिबिम्बं च बिम्बेन बाह्यस्थेन समर्प्य ते।
तस्यैव प्रतिबिम्बत्वे किं बिम्बमवशिष्यताम्।।

श्रीचिद्गगनचन्द्रिकाकार का कथन है कि—

वह्निवारिमुकुरादिषु स्फुटं स्वच्छवस्तुषु कुमारि बिम्बता।
मन्त्रिता सह परिच्छदेन यत् तेन बिम्बमनवेक्षितं तव।।

यह प्रतिबिम्ब युक्ति अलौकिकी है और यह शांभव उपाय में पर्यवसित होती है। शास्त्रों में यह भी कहा गया है—

मत्त एवोदितमिदं मय्येव प्रतिबिम्बितम्।
मदभिन्नं जगच्चेति त्रिधोपायस्तु शाम्भवः।।

श्रीतन्त्रवटधानिकाकार की दृष्टि—तन्त्रवटधानिका में कहा गया है—

यथादर्शे घटादीनां स्थितिर्मिश्रेतरात्मिका।
मदात्मनि तथाऽमीषां भावानां चित्ररूपिणी।।

आदर्श तो परिमित प्रतिबिम्बन करता है; किन्तु परमेश्वर में स्वातन्त्र्य शक्ति के कारण अनन्त विश्वप्रतिबिम्बनक्षमत्व है। प्रकाशस्वरूप परमात्मा में विश्व का परिस्फुरण लौकिक बिम्ब-प्रतिबिम्बन नहीं है। क्या यह विवर्त है या परिणाम?

विवर्त क्या है? 'विवर्तो' नाम भ्रान्त्यपरपर्यायमन्यस्यान्यत्रारोपणात्मकं ज्ञानमुच्यते' अर्थात् विवर्त एक भ्रान्ति है। अन्य में अन्य का आरोप होने से जो ज्ञानोदय होता है, उस ज्ञान की आख्या ही है—विवर्त। विश्वात्मा में आत्मा का, विश्व का आत्मा में या आत्मा का विश्व में आरोप विवर्त ही है; यथा—जल में तरंग या जल में आवर्त-बुद्बुद, रज्जु में सर्प का आरोप भी विवर्त है। इसी प्रकार विश्व का आत्मा में आरोप किया जाता है।

आगम की दृष्टि—आगमों में कहा गया है कि—एकमेवाद्वितीयं ब्रह्म, नेहना-नास्ति किञ्चन' अत: आत्मा, विश्व एवं परमात्मा में भेद-प्रथा अनुपपन्न है। महेश्वरानन्द पूछते हैं—ब्रह्म में यह प्रपञ्च किस प्रमाता के द्वारा आरोपित किया गया है?

महेश्वरानन्द शाङ्कर विवर्तवाद को तो स्वीकार नहीं करते और न तो परिणामवाद को ही स्वीकार करते हैं; किन्तु विवर्तवाद को उसकी इस व्याख्या के आधार पर अवश्य स्वीकार कर लेते हैं कि—वैचित्र्येणोक्तप्रकारप्रतिबिम्बनस्वभावेन वर्तनं विश्वस्य विवर्त इति व्याख्यायां न किञ्चिदनौचित्यम्। अत: 'विवर्तो विचित्रेण रूपेण वर्तनं न त्वविद्या-वशात् अपितु स्वातन्त्र्यत:।'

यहाँ वर्तन का कारण अविद्या नहीं है; प्रत्युत स्वेच्छागृहीत आत्मगोपनात्मक स्वरूप है, जो कि स्वातन्त्र्य शक्ति के कारण आविर्भूत हुआ करता है।

ताटस्थ्यशालिनी स्वातन्त्र्य शक्ति (संवित् स्वातन्त्र्य शक्ति) या महासत्ता के द्वारा विश्व व्यवहार के प्रयोजन से एक बहुत हो जाता है; किन्तु इस बहुत्व में भी अनेकता नहीं; (तत्त्वत:) एकता अनुस्यूत है।

जहाँ तक परिणाम की बात है, वह ऐसा परवर्ती परिवर्तन या रूपान्तरण है, जो अपनी पूर्वावस्था में कभी लौट नहीं सकता; यथा—दूध से बना दही। इसमें प्रथम रूप नष्ट हो जाता है और नये पदार्थ का आविर्भाव होता है; किन्तु शैवागम में इस दृष्टि को भी स्वीकार नहीं किया गया है।[१] क्या ब्रह्म विश्व के रूप में परिणत हो गया है या कि विश्व ब्रह्म के रूप में? प्रथम तर्क तो ठीक नहीं है; क्योंकि इससे तो ब्रह्म का स्वरूप ही नष्ट हो जाएगा। द्वितीय तर्क भी ठीक नहीं है; क्योंकि विश्व में सच्चिदानन्दत्व का स्वभाव नहीं है। अत: शैवागम को विवर्तवाद, परिणामवाद, आरम्भवाद, प्रतिबिम्बवाद आदि कोई सिद्धान्त स्वीकार नहीं है। प्रतिबिम्बवाद में मिथ्यात्वशंका की आपत्ति आती है। स्वच्छ दर्पणादि द्रव्य के द्वारा प्रतिहत लोचन-रश्मियाँ परावृत्त होकर अपने को ग्रहण

---

१. परिमल

करती हैं; अतः दर्पण में पुरुष की प्रतीति हो रही है—यह कथन भी अनुपपन्न है।

याथार्थ्य क्या है? याथार्थ्य इस प्रकार है—'पारमेश्वरी प्रतिबिम्बभङ्गिरलौकिकत्वादनवद्यामेव कक्ष्यामधिरोहति।' यहाँ पृथक् रूप से बिम्बापेक्षा भी नहीं है। श्रीतन्त्रालोककार प्रश्न उठाते हैं कि—

ननु बिम्बस्य विरहे प्रतिबिम्बं कथं भवेत्?
किं कूर्मो दृश्यते तद्धि ननु तद्बिम्बमुच्यताम्।।
नैवं तल्लक्षणाभावाद् बिम्बं किल किमुच्यते।
अन्यामिश्रं स्वतन्त्रं सद् भासमानं मुखं यथा।।

प्रतिबिम्बवाद उपयुक्त सिद्धान्त नहीं है—

अन्यव्यामिश्रणायोगात् तद्भेदाशक्यभासनम्।
प्रतिबिम्बमिति प्राहुर्दर्पणे वदनं यथा।।
बोधमिश्रमिदं बोधाद् भेदे वा शक्यभासनम्।
पुरतत्त्वादिबोधे किं प्रतिबिम्बं न भास्यते।।

सौगत सिद्धान्त भी प्रतिबिम्बवाद मानता है; किन्तु आगमिक शैव उसे भी स्वीकार नहीं करते।

सौगत प्रतिबिम्बवाद का खण्डन—अभिनवगुप्तपादाचार्य द्वारा श्रीप्रत्यभिज्ञाविवृत्ति-विमर्शिनी में कहा गया है—

१. वित्तौ वेद्यमेव प्रतिबिम्बति न पुनर्वित्तिर्वेद्ये।
२. अस्माकं तु सौगतस्यापि संविदि संवेद्यं प्रतिबिम्बमर्पयति न तु संवेद्ये संवित्।
३. वित्तौ वेद्यमिव वेद्ये च वित्तिः प्रतिबिम्बमुत्पादयति। उभयमपि वेदितुः परमेश्वरस्य स्फुरणप्रकार इति स्वच्छत्वोत्कर्षं प्रति न किञ्चिद् वैषम्यमनुभवति।

संविदुल्लासकार की दृष्टि—अभिनवगुप्त कहते हैं कि—

आदर्शयोरिवान्योन्यं लम्भितप्रतिबिम्बयोः।
शिवशक्त्योरनन्ताः स्युरन्तरन्तः प्रसक्तयः।।

वहीं यह भी ध्यातव्य है—

बोध्यमिश्रमिदं बोध्याद् भेदे वा शक्यभासनम्।
ज्ञानस्मृत्यादि बोध्ये किं प्रतिबिम्बं न भण्यते।।

विवर्तवाद एवं परिणामवाद की अपेक्षा तो प्रतिबिम्बवाद ही शैवमतानुकूल है; किन्तु आभासवाद एवं स्वातन्त्र्यवाद की तुलना में परवर्ती सिद्धान्त एवं परवर्ती सिद्धान्तों में भी स्वातन्त्र्यवाद ही शैवागमानुकूल (त्रिकाद्वैतानुकूल) है।

स्वातन्त्र्यवाद

आचार्य उत्पलदेव अजडप्रमातृसिद्धि के श्लोक—

एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी।
जडाः प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः।। (१३)

की व्याख्या करते हुये कहते हैं—इत्थं जडभावानां संविद्विश्रान्तिं विना सत्कल्पत्वात् स्वात्मन्यसत्स्वभावानां ज्ञातुः प्रकाशस्वभावस्य सम्बन्धितयैव सत्त्वं, तस्मात्संवित्प्रकाश एव स्वात्मोच्छलत्तया स्वमायाशक्त्युल्लासिते विश्ववैचित्र्ये जडाजडभावराशिद्वयेन वेद्य-वेदकात्मकेन स्वरूपानतिरिक्तेनातिरिक्तेनेव प्रस्फुरेत् इति स्वातन्त्र्यवादस्य प्रोन्मीलनं सूचितवानाचार्यः।

यह भी कहा गया है कि मृषात्ववादी, कार्यत्ववादी, प्रतिभेदवादी एवं असत्यवादी में से कोई भी शिव की यथार्थ स्थिति को नहीं जानता—

अतः प्रपञ्चस्य मृषात्ववादी कार्यत्ववादी प्रतिभेदवादी।
असत्यवादी च परेश! शम्भो! तव स्थितिं नेषदपि स्पृशन्ति।।

यह भी ध्यातव्य है कि—

स्वस्यैव स्फुरणं मुख्यं विश्वस्मिन्नधिरोप्यते।
ननु नौकाधिरूढस्य चलतीवापगातटम्।।

महेश्वरानन्द का कथन है कि—

इति गुरुपदपरिचर्यातात्पर्यधनो महेश्वरानन्दः।
प्रतिबिम्बवादसम्पत्सौभाग्यं स्वहृदयार्थमाचख्यौ।।

तन्त्रालोककार की दृष्टि—अभिनवगुप्तपाद कहते हैं कि उपायों की रस्सी से उपेय को नापना सम्भव नहीं है; क्योंकि—

यावानुपायो बाह्यः स्यादान्तरो वापि कश्चन।
स सर्वस्तन्मुखप्रेक्षी तत्रोपायत्वभाक् कथम्।।

तन्त्रवटधानिकाकार की दृष्टि—तन्त्रवटधानिका में स्पष्टतः कहा गया है कि शिव उपायों से कभी प्रकाशित नहीं होते। वे स्वप्रकाश हैं और अपने भास में विश्व-प्रकाशक और विश्वस्वरूप हैं—

उपायैर्न शिवो भाति भान्त्यमी तत्प्रसादतः।
स एवाहं स्वप्रकाशे भासे विश्वस्वरूपकः।।

स्वातन्त्र्यवाद का स्वरूप—अद्वैतवाद के अनेक रूप हैं, उसमें अद्वैतवादी शैवागम (त्रिकमत का साहित्य) द्वयात्मक अद्वयवाद 'शिवाद्वयवाद' मानता है।

स्वातन्त्र्य क्या है? कर्तुं, अकर्तुं एवं अन्यथाकर्तुं की सामर्थ्य वाली अघटन-घटनापटीयसी शैवी पराशक्ति का नाम ही है—स्वातन्त्र्य। स्वातन्त्र्य शिव की स्व-समवेता शक्ति है। यह शिव की समवायिनी, नित्या, अन्तरङ्गा, शिवाभिन्ना शक्ति है। इसका अपर पर्याय है—आनन्द। अतिदुर्घटकारित्व परमात्मा का ऐश्वर्य है। ऐश्वर्य को उत्पलदेव ने स्वातन्त्र्य शक्ति का पर्याय स्वीकार किया है।[१]

परमेश्वर अपने स्वातन्त्र्य या ऐश्वर्य से अनन्त रूपों में स्फुरित होता हुआ भी स्व-रूपत: अखण्ड एवं पूर्ण रहता है। परमात्मा की इच्छा का अनभिहत प्रसार ही उसका स्वातन्त्र्य है—

(क) स्वातन्त्र्यं च नाम यथेच्छं तत्रेच्छाप्रसरस्य अविघात:।[२]

(ख) एतदेव स्वातन्त्र्यं यदतिदुर्घटकारित्वम्।

शास्त्रों में जिसे परमेश्वर का ऐश्वर्य या स्वातन्त्र्य कहा जाता है, वही नित्योदित परा वाक् है। इसे ही तत्त्वमनीषियों ने 'विमर्शात्मा चिति' भी कहा है। यह शब्दतत्त्व सृष्टि के प्रसार की आदि कोटि है और सृष्टि-सङ्कोच की अवस्था में यह चरम कोटि है। शिव प्रकाशात्मा चिति है। 'चैतन्यमात्मा' (शिवसूत्र-१.१) कहकर वसुगुप्त ने आत्मा या संवित्तत्व को चैतन्य माना है। शिव और चिति (शक्ति) अविनाभूत हैं।

शिव की अवस्थायें

१. अविभक्त या अन्तर्लीन—विमर्शात्मक संवित् स्वभाव एवं निष्कल शिव को परमशिव कहते हैं।

(निष्कल = कलारहिता। क्या शिव शक्तिरहित भी रहता है? नहीं। शक्ति (कला) जब शिव में लीन रहती है तब शिव को निष्कल कहते हैं। इस समय कला कोई कार्य नहीं करती।)

चिद्रूपाह्लादपरमो निर्विभाग: परस्तदा (शिवदृष्टि-१.४)

सृष्टि-सङ्कोच की अवस्था। निष्कल दशा।

२. नित्योदित परावाक् की अवस्था—विमर्शात्मा चिति की अवस्था। आदि कोटि प्रकाश-विमर्शात्मक संवित्स्वभाव भगवान् परमशिव अपनी स्वातन्त्र्य शक्ति से रुद्र आदि प्रमाताओं एवं अन्य नीलसुख आदि प्रमेयों के रूप में प्रकट होते हैं।



प्रकाश-विमर्शात्मक संवित्स्वभाव भगवान् परमशिव अपने स्वातन्त्र्य से रुद्र-

१. ईश्वरप्रत्यभिज्ञाकारिका २. ईश्वरप्रत्यभिज्ञाविमर्शिनी वि. (१.१)

प्रमाताओं एवं नीलसुखादि प्रमेयों के रूप में प्रकाशित होते हैं। इस स्थिति में भी स्वरूप का तात्त्विक आच्छादन तो नहीं हो पाता, किन्तु जागतिक धरातल पर स्वेच्छागृहीत स्वरूपाच्छादन तो होता ही है। स्वरूपाच्छादित होकर भी परमशिव तत्त्वत: अनाच्छादित ही रहता है; यथा—बादलों से ढका सूर्य।

अभिनवगुप्तपाद की दृष्टि—अभिनवगुप्तपाद स्वातन्त्र्यवाद पर प्रकाश डालते हुये कहते हैं—तस्मादनपह्नवनीय: प्रकाशविमर्शात्मा संवित्स्वभाव: परमशिवो भगवान् स्वातन्त्र्यादेव रुद्रादिस्थावरान्तप्रमातृरूपतया नीलसुखादिप्रमेयरूपतया च अनति-रिक्तयापि अतिरिक्तयेव स्वरूपानाच्छादिकया संवित् स्वरूपनान्तरीयकस्वातन्त्र्यमहिम्ना प्रकाशते इत्ययं स्वातन्त्र्यवाद: प्रोन्मीलित:।[१]

स्वातन्त्र्यवाद का सिद्धान्तत: क्या अर्थ है? स्वातन्त्र्य परमशिव की शक्ति का नाम है। परमशिव बिना किसी भी उपायान्तर, उपादानान्तर, निमित्तान्तर एवं परापेक्षा के ही अपनी कर्तुं-अकर्तुं-अन्यथाकर्तुं शक्ति (स्वातन्त्र्य शक्ति) के द्वारा सृष्टि के सारे कार्य—सृष्टि, स्थिति, संहार, तिरोधान एवं अनुग्रह आदि समस्त व्यापार स्वभावत: निष्पन्न कर लेता है और समस्त जगत् एवं जगत् की समस्त सत्तायें शिव की इसी स्वातन्त्र्य शक्ति का विजृम्भणमात्र हैं अर्थात् सब कुछ स्वातन्त्र्य शक्तिमात्र ही है—यही सिद्धान्त स्वातन्त्र्यवाद है। यही अनतिरिक्त को अतिरिक्तवत् प्रकाशित करती है, यही अखण्ड को खण्डितवत् प्रसृत करती है; यही स्वाभिन्न को भिन्नवत् प्रकाशित करती है तथा एक को अनेक के रूप में अभिव्यक्त करती है। इस शक्ति के अनेक नाम हैं; यथा—

चिति: प्रत्यवमर्शात्मा परावाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मन:।।
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिन:।।[२]

यही स्वातन्त्र्य शक्ति अपृथक् को पृथग्वत्, अखण्डित को खण्डितवत् करने का अवभास आविर्भूत करती है—

आत्मानमत एवायं ज्ञेयीकुर्यात्पृथक्स्थिति।
ज्ञेयं न तु तदौन्मुख्यात् खण्ड्येतास्य स्वतन्त्रता।।
मायाशक्त्या विभो: सैव भिन्नसंवेद्यगोचरा।
कथिता ज्ञानसङ्कल्पाध्यवसायादिनामभि:।।[३]

योगियों की भाँति परमशिव भी बिना किसी बाह्योपादानों के जो सृष्टि करता है—

---

१. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी
२. प्रत्यभिज्ञाकारिका (उत्पलदेव)
३. प्रत्यभिज्ञाकारिका (१.४९)

अपने भीतर स्थित सत्ता का बाह्य प्रकाशन करता है—

चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।[१]

वह भी इसी स्वातन्त्र्य शक्ति के कारण करता है; किन्तु शिव एवं उसकी शक्ति चन्द्र-चन्द्रिकयोरिव परस्पर अभिन्न हैं।

आभासवाद—आभासवाद का स्वरूप क्या है? क्या है आभास? सङ्कुचित रूप से प्रकाशन ही आभास है—'आभासनं आ ईषत् सङ्कोचेन भासनं प्रकाशना'।[२] आचार्य अभिनवगुप्त कहते हैं कि प्रतिबिम्ब भी एक आभास ही है—भासनसारतैव हि प्रतिबिम्बता। इह अवभासनसारमेव प्रतिबिम्बतत्त्वम्।

आभास का द्विपक्षात्मक स्वरूप—

१. विमर्शात्मक प्रकाशपुरुष का अपूर्ण (सङ्कुचित) आत्मप्रकाशन ही आभास है।

२. विमर्शात्मक प्रकाशपुरुषरूपी दर्पण में अनतिरिक्त होते हुये भी अतिरिक्त के समान जड़-चेतनात्मक समस्त जगत् का प्रतिबिम्बन आभास है।

प्रतिबिम्बवाद—जगत् परमशिव एवं उसकी शक्ति का प्रतिबिम्बमात्र है। इसके लिये दर्पणविधि को उदाहरण के रूप में स्वीकार किया गया है। प्रतिबिम्बवादी दृष्टि का लक्ष्य है—भेददृष्टि का उन्मूलन। द्वैतप्रथात्मक ज्ञान मिथ्या है; क्योंकि द्वैत किसी एकमेवाद्वितीयम् स्वरूप वाले अद्वैत का आभासमात्र ही है; शेष कुछ भी नहीं है। यही आभास प्रतिबिम्ब है; किन्तु उसकी तात्त्विक सत्ता नहीं है; क्योंकि—

न देशो नो रूपं न च समययोगो न परिमा
न चान्योन्यासङ्गो न च तदपहानिर्न घनता।
न चावस्तुत्वं स्यान्न च किमपि सारं निजमिति
ध्रुवं मोहः शाम्येदिति निरदिशद्दर्पणविधिः।।[३]

दर्पण से पृथक् प्रतिबिम्ब की कोई अपनी स्वतन्त्र सत्ता नहीं है। दर्पण से पृथक् उसका कोई देश भी नहीं है। प्रतिबिम्ब कोई कठिन मूर्ति भी नहीं है, अन्यथा उसका कोई स्वतन्त्र देश होता। प्रतिबिम्ब में कोई घनता भी नहीं है। इसका काल से कोई सम्बन्ध भी नहीं है। इसमें कालयोग का अभाव है। इसमें घनताभाव के कारण ही परिमाण भी नहीं है। इसमें अन्योन्यासङ्ग भी नहीं है। इसे वस्तु या अवस्तु भी नहीं कह सकते।

प्रतिबिम्ब के लिये इससे पृथक् किसी बिम्ब की आवश्यकता होती है; किन्तु यहाँ

१. प्र. का. (१.३८)
२. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी
३. तन्त्रालोक

महाचिति—

१. चितिः स्वतन्त्रा विश्वसिद्धिहेतुः।

२. स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति (शक्तिसूत्र-(१.२)

उन्मीलनं च अवस्थितस्यैव प्रकटीकरणम्। इत्यनेन जगतः प्रकाशैकात्म्येन अवस्थानम्।[१]

शक्ति आत्मभित्ति पर विश्व को प्रतिबिम्बित करती है—स्वयं ही दर्पण है, स्वयं ही बिम्ब है और स्वयं ही प्रतिबिम्ब है; यथा—स्वप्न में राजा, मन्त्री, सेना, जङ्गल, युद्ध, विरोधी सेना, जय, पराजय आदि की स्वप्निल कथा की प्रत्येक वस्तु स्वयं आत्मा ही होती है।

अभिनवगुप्ताचार्य की दृष्टि—आचार्य अभिनवगुप्त कहते हैं—

अन्तर्विभाति सकलं जगदात्मनीह यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः पुनर्निजविमर्शनसारवृत्त्या विश्वं परामृशति नो मुकुरस्तथा तु।।

भास्करी में मन में उल्लेखन को ही अवभासन कहा गया है—उल्लेखनं मनसि कल्पनम्। अवभासनं विकल्पघनीभावेन स्फुटीकरणम्।

परमशिव स्वस्थ जगत् को अवभासित या उन्मीलित करता है। सारे चेतन एवं जड़ पदार्थ मात्र अवभास हैं। अपनी स्वातन्त्र्य शक्ति (या प्रतिभा) से शिव अनन्त ग्राह्य एवं ग्राहकों के रूप में अवभासित होते हैं—तन्नाना अनुरूपग्राह्यग्राहकभेदात्।[२]

विश्व, अवभास एवं भैरवसंवित्—विश्व एवं अवभास भैरव संवित् के ही रूपान्तर हैं; क्योंकि—इदं ..... विश्वं एकस्यां वा परस्यां भैरवसंविदि अविभागेन बोधात्मकेन रूपेणास्ते।

अभिनवगुप्त की दृष्टि—अभिनवगुप्त कहते हैं—

यस्यामन्तर्विश्वमेतद्विभाति बाह्याभासं भासमानं विसृष्टौ।
क्षोभे क्षीणेऽनुत्तरायां स्थितौ तां वन्दे देवीं स्वात्मसंवित्तिमेकाम्।।

क्षोभदशा सृष्टि की अवस्था है। इसके भीतर बाह्य आभासरूप विश्व आभासित होता है; किन्तु क्षोभ के क्षीण होने पर अनुत्तरात्मक स्थिति में वह अखण्ड स्वात्मसंवित्तिस्वरूप में पुनः विलीन होकर वही हो जाता है। यथार्थ तो यही है कि—विश्वरूपो महेश्वरः।[३]

---

१. प्रत्यभिज्ञाहृदयम् (क्षेमराज)

२. शक्तिसूत्र (३)

३. प्रत्यभिज्ञाकारिका (१.२३)

माया शक्ति के द्वारा अखण्ड में खण्डितवत् जगत् आभासित होता है—तन्निमित्तादेव यस्मादख्यातिमयमेतद्विश्वं भासते।[१] परमेश्वर की इच्छा के कारण ही भासन क्रिया होती है—इच्छया भासयेद्वहिः।[२]

योगी की अन्तर्मुखता

अथेत्थमुपदिष्टोपायप्रपञ्चप्रतिलब्धात्मस्वरूपपरामर्शमांसलोल्लासानां योगिनामतिशयमाख्यास्यन्नादावेषामन्तर्बहिःस्वभावदशविच्छेदव्युदासनिर्यन्त्रणं नैश्चिन्त्यं निश्चेतुमाह—

अविआरोहअपासे चासअवेहुणसरिश्शए अत्थे।
अन्तोहुत्तो जोई बाहिरहुत्तो ति कप्पणा कत्तो ॥६०॥

(अविकारोभयपार्श्वे चाषपिञ्छसदृक्षेऽर्थे।
अन्तर्मुखो योगी बहिर्मुख इति कल्पना कुतः।।)

नीलकण्ठ के पीले नेत्रों के सदृश दोनों पार्श्वों में अविकृत रूप से स्थित परमतत्त्व में अन्तर्मुख होकर योगी बहिर्मुख हो जाय—इस बात की कल्पना भी नहीं की जा सकती।।६०।।

अर्थ्यते सर्वैः प्राप्यत इत्यर्थः। स्वात्मरूपं किञ्चिदलौकिकं तत्त्वम्। तत् खलु मयूरपिच्छवैलक्षण्येन चाषबर्हवद् द्वयोरपि भागयोगैकरूपतयाऽवधार्यते। चाषमयूरपक्षप्रक्रिया तु लोकप्रसिद्धा।

उक्तरूपस्य चार्थस्यैतदेव पार्श्वद्वयं यदहन्तेदन्तयोरौचित्यादन्तर्बहिर्भावेनास्य द्विधाऽवभासमानत्वम्। तद्व्यतिरिक्ता च नान्या देशस्फुरत्ताऽस्ति, पौरस्त्यपाश्चात्यरूपाया अप्यस्या एतदन्तर्भावेनोपलभ्यमानत्वात्। तयोश्च पार्श्वयोः स्थूलदृष्ट्यवष्टम्भोपकल्पितो यो विकारो वेद्यवेत्तृत्वादिव्यवस्थानिबन्धनो वैषम्यानुभवः, स वस्तुवृत्त्यालोचनायामनौचित्यसरणिमनुसरतीत्यविकारत्वम्। न खल्वहन्तेदन्तयोरुभयोरपि संवित्स्वातन्त्र्यपरिस्पन्दव्यतिरेकेणान्या काचिदनुप्राणनप्रक्रियास्ति, यदेवं विक्रिया संभाव्येत। अर्थ इत्यत्र कर्तरि ज्ञातरीत्यादिवत् सप्तमी सिद्धस्वभावतां द्योतयति।

तदर्थमस्मिन्नर्थेऽवस्थिते—

ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम्।
योगिनां तु विशेषोऽयं सम्बन्धे सावधानता।।

---

१. अजडप्रमातृसिद्धिवृत्ति (उत्पलाचार्य)
२. प्रत्यभिज्ञाकारिका (१.५९)

इति श्रीविज्ञानभट्टारकस्थित्या वेद्यवेदितृसम्बन्धपरामर्शस्वभावं योगमात्मानुप्राणनत्वेनाङ्गीकुर्वतस्तत एव परतत्त्वैक्यशालिनः प्रमातुः स्वात्मनिष्ठतारूपमन्तर्मुखत्वं वेद्यव्यक्षेपलक्षणा बहिःप्रवृत्तिश्चेति या कल्पना कृत्रिमा प्रक्रिया सा कुतो हेतोरस्तु, न कुतश्चिदपि संगच्छते। निमीलनोन्मीलनात्मनोः समाध्योरपि तादृक्कल्पनामात्रनिष्पन्नत्वावश्यम्भावादिति भावः। एतदुक्तं भवति—तत्तत्प्रौढपुरुषकल्पनैकनिर्व्यूढो योऽयं वेदिता वेद्यम्, शक्तिमान् शक्तिः, पतिः पाशः, भवन् भावः, दग् दृश्यम्, पुरुषः प्रकृतिः, आत्मा शरीरम्, अन्तःबहिः, प्रत्यक् पराक्, सत्यमसत्यमित्यादिविकल्पव्याकोपः, स सर्वोऽपि—

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्।
तस्माच्छब्दार्थचिन्तासु न साऽवस्था न या शिवः।।
वस्तुतः शिवमये हृदि स्फुटं सर्वतः शिवमयं विराजते।
चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः।।

इत्याद्यनेकाम्नायमर्यादया पारमेश्वरप्रकाशपरमार्थमेतदखिलमपि प्रपञ्चमालोच-यतः साक्षात् परमेश्वरतापन्नस्य महापुरुषस्य स्वात्मस्वरूपव्यतिरेकेण किं प्रमाणं कः परिस्फुरत्विति। यदुक्तं श्रीमत्स्तोत्रावल्याम्—

योऽविकल्पमिदमर्थमण्डलं पश्यतीश! निखिलं भवद्वपुः।
स्वात्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्।। इति।

यच्चोक्तं श्रीप्रत्यभिज्ञायाम्—

सर्वो ममायं विभव इत्येवमभिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता।। इति।

यथा चोक्तमभियुक्तैः—

अन्तर्निरञ्जनं ज्योतिर्बहिरष्टौ च मूर्तयः।
परितः परितः शय्या हंसाङ्गरुहलूलिका।। इति।

अन्तर्मुखी योगी एक बार अन्तर्मुख हो जाने पर पुनः बहिर्मुखता के निकृष्ट संसार में प्रत्यावर्तित होने की न तो आकांक्षा रखता है और न तो उसका इस संसार में पदार्पण ही होता है। अन्तर्मुखता और बहिर्मुखता में छत्तीस का आँकड़ा है। हाँ, विश्वाहन्ता की स्थिति में जाने पर दोनों का पार्थक्य भी विगलित हो जाता है।

जो योगी अन्तर्मुखत्व प्राप्त कर लेता है, वह कभी बाह्यमुखत्व की ओर उन्मुख नहीं होता—अन्तर्मुखो योगी बहिर्मुख इति कल्पना कुतः।

जिस प्रकार मोर के दोनों ओर के पंखे एकरूपात्मक होते हैं और उनमें कोई

वैषम्य नहीं रहता, उसी प्रकार योगी के इदम् एवं अहम् दोनों संवित्तियों में एकरूपता रहा करती है—'न खल्वन्तेदन्तयोरुभयोरपि संवित्स्वातन्त्र्यपरिस्पन्दव्यतिरेकेणान्या काचिदनुप्राणनप्रक्रियास्ति, यदेवम्।' इसीलिये योगियों की दृष्टि सामान्य लोगों से पृथक् मानी गई है। श्रीकृष्ण गीता में कहते हैं—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।

विज्ञानभट्टारककार की दृष्टि—विज्ञानभट्टारक में कहा गया है—

ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम्।
योगिनां तु विशेषोऽयं सम्बन्धे सावधानता।।

इसी सामरस्य एवं तादात्म्य की स्थिति में 'योऽयं वेदिता वेद्यम्, शक्तिमान् शक्तिः, पतिः पाशः, भवन् भावः, दृग् दृशम्, पुरुषः प्रकृतिः, आत्मा शरीरम्, अन्तर्बहिः, प्रत्यक् पराक्, सत्यमसत्य इत्यादिविकल्पव्याकोपः स सर्वोऽपि—

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्।
तस्माच्छब्दार्थचिन्तासु न साऽवस्था न या शिवः।

वस्तुतः

शिवमये हृदि स्फुटं सर्वतः शिवमयं विराजते।।
चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः।।

परमेश्वरतापन्न महापुरुषों में स्वात्मस्वरूप व्यतिरिक्त कुछ रहता ही नहीं—परमेश्वरतापन्नस्य महापुरुषस्य स्वात्मस्वरूपव्यतिरेकेण किं प्रमाणं कः परिस्फुरति?

शिवस्तोत्रावलीकार की दृष्टि—उत्पलदेवाचार्य कहते हैं—

योऽविकल्पमिदमर्थमण्डलं पश्यतीश! निखिलं भवद्वपुः।
स्वात्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्?।।

प्रत्यभिज्ञाकार की दृष्टि—आचार्य उत्पलदेव प्रत्यभिज्ञाकारिका में कहते हैं कि निःशेष जगत् और इसकी निःशेष विभूति सब मेरी ही है—इस परामर्श के रहने पर सारे विकल्प भले ही चतुर्दिक् फैले हुये हैं तथापि जीव फिर भी महेश ही है—

सर्वो ममायं विभव इत्येवमभिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता।।

यह भी कहा गया है कि—

अन्तर्निरञ्जनं ज्योतिर्बहिरष्टौ च मूर्तयः।
परितः परितः शय्या हंसाङ्गरुहतूलिका।।

योगी और अवस्थाचतुष्टय

अथ देशाध्वनेव कालाध्वनाऽप्यस्य न कश्चित् सङ्कोचकलङ्कोपलेप इत्युन्मीलयितुमाह—

जोई जाअरसिविणअसोसुत्ततुरीअपव्वपरिपाहिं ।
चित्तं विअ मणिमालं विमरिससुत्तेक्कगुम्भभुव्वहइ ॥६१॥

(योगी जागरस्वप्नसौषुप्ततुरीयपर्वपरिपाटिम्।
चित्रामिव मणिमालां विमर्शसूत्रैकगुम्फितामुद्वहति।।)

योगी रंग-विरंगी मणिमाला के समान विमर्श-सूत्र में गुम्फित जाग्रत्, स्वप्न, सुषुप्ति एवं तुरीय अवस्थाओं की परिपाटी का उद्वहन करता है।।६१।।

यान्येतानि जागरप्रभृतीनि कालक्रमानुप्राणनानि पर्वाण्यवस्थाविशेषाः, तत्र लौकिक्या युक्त्या सर्वसाधारण्येनार्थं विषयीकृत्य बाह्याभ्यन्तरोभयेन्द्रियजन्यं जागरः, अन्तःकरणमात्रहेतुरसाधारणार्थनिर्माणात्मा विकल्पः स्वप्नः, सर्वाकारेणार्थस्फुरणशून्यता सौषुप्तम्। यदुक्तं श्रीशिवसूत्रेषु—'ज्ञानं जाग्रत्, स्वप्नो विकल्पः, अविवेको माया सौषुप्तम्' इति। यच्चोक्तं श्रीप्रत्यभिज्ञायाम्—

सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा ।
सृष्टिः साधारणी सर्वप्रमातृणां स जागरः ।। इति,
मनोमात्रपथोऽप्यक्षविषयत्वेन विभ्रमात् ।
स्वष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम् ।। इति
तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम् । इति च।

योगिदृष्ट्या तु धारणाध्यानसमाधिरूपाण्येतानि। यानि 'चित्तस्य देशबन्धो धारणा, तत्तत्प्रत्यय प्रवाहो ध्यानम्, वेद्यवेदकभावादिविगलनं समाधिः इत्यागमेषु लक्ष्यन्ते। तुरीयं पुनः सर्वयोगिन्ययोगिन्यप्येकरूपतयाऽवतिष्ठते। केवलं तादृक्परामर्शक्षमत्वमेव योगिनो विशेष। तुरीयं च नाम 'त्रिषु चतुर्थं तैलवदासेच्यम्' इति श्रीशिवसूत्रस्थित्या जाग्रदाद्यवस्थात्रयानुवृत्ता महास्फुरत्ता। उपलक्षणं चैतत्। यत एकस्मिन् द्वितीयम्, द्वयोस्तृतीयम्, त्रिषु चतुर्थम्, चतुर्षु पञ्चममित्यस्यार्थस्यावश्यम्भावः। तत् पुनरौपदेशिकतया सूत्रे संगृह्योक्तम्। एषां च पर्वणां या परिपाटिरन्योन्यरूपत्वे व्यवस्थात्मकत्वादेकरूपता, तां व्याख्यातस्वभावो योगी मौक्तिकमाणिक्याद्यनेकरत्नशालिनीं हारयष्टिमिव विमर्शाख्येन सर्वानुप्रवेशप्रगल्भेनैकेन तन्तुना संकलितां कुर्वन्नुद्वहति लौकिकप्रस्थानोल्लङ्घिना केनचिदुत्कर्षेण प्रापयति तत्तत्स्वरूपतापरामर्शेन स्वात्मन्यवस्थापयति। तत्र च लौकिकानामपि साधारणमवस्थात्रयमतिक्रम्य परमप्रमातृरूपतुर्यातीतस्वभावतया-

ऽवधार्यमाणं तुर्यमेवात्र विमर्श इत्याख्यायते, येन स्रक्सूत्रन्यायादधस्तनमवस्थात्रयं क्रोडीक्रियते। तत्रापि जाग्रदादिसाहचर्याक्रान्तस्याङ्गस्य प्रमातृस्वरूपानुप्रविष्टेनांशेनानुसन्धीयमानतया क्रोडीकार्यत्वं क्रोडीकरणत्वं चेत्युभयमपि सङ्गच्छते। तथाहि—जाग्रदादिषु चतसृष्ववस्थासु जाग्रज्जाग्रत्, जाग्रत्स्वप्नः, जाग्रत्सुषुप्तम्, जाग्रत्तुरीयमित्यादिना रूपेण परस्परानुबेधः प्रतीयते। तत्राबुद्धं बुद्धं प्रबुद्धं सुप्रबुद्धमिति जाग्रतश्चत्वारो भेदाः।

गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम्।

इति स्वप्नस्य, उदितं विपुलं शान्तं सुप्रसन्नमिति सुषुप्तस्य। तुरीयस्य तु—

नैतस्यामपरा तुर्यदशा संभाव्यते किल।

इति श्रीतन्त्रालोकस्थित्या मनोन्मनमनन्तं सर्वतोभद्रमिति त्रयो भेदाः। तुर्यातीते च—

तुर्यातीते भेद एकः सततोदितमित्ययम्।

इति नीत्या नित्यविप्रष्टताद्योतकसततोदितमित्येको भेद उपचर्यते। (एषा च? एतस्याः) स्फुटः स्फुटास्फुटोऽस्फुट इत्यवभासभेदात् सर्वत्रानुस्यूत्याऽवस्थानं च। क्रमाल्लक्षणान्याचक्षते। यदुक्तं श्रीतन्त्रालोके—

यस्य यद् यत् स्फुटं रूपं तज्जाग्रदिति मन्यताम्।
यदेवास्थिरमाभाति स्वरूपं स्वप्न ईदृशः॥
अस्फुटं तु यदाभाति सुषुप्तं तत् पुरोऽपि यत्।
त्रयस्यास्यानुसन्धिस्तु यद्वशादुपजायते॥
स्रक्सूत्रकल्पं तत्तुर्यं सर्वभेदेषु गृह्यताम्॥ इति।

तुर्यातीतं तु सर्वत्रैकरूप्यादव्याकुलं स्वात्मरूपपरमभैरवस्वभावमनुभूयते। यदुक्तं तत्रैव—

यत्त्वद्वैतभरोल्लासद्राविताशेषभेदकम्।
तुर्यातीतं तु तत् प्राहुरित्थं सर्वत्र योजयेत्॥ इति।

तेन सुष्ठूक्तं तुर्यस्योभयार्थप्रसाधनप्रागल्भ्यमस्तीति। अनेनैवाशयेनोपमानांशे चित्रामित्युक्तम्। ततश्च यथा माणिक्यमौक्तिकमहानीलमरकताद्यनेकमणिगुम्फिता हारयष्टिररुणधवलश्यामलादिवर्णवैचित्र्यव्यतिकरोत्तरतया क्वचित् कस्यचिदसाधारण्येऽपि व्यतिरिक्ताशेषवर्णसंसर्गाविनाभावमनुभवन्त्यपरोक्षीक्रियते, एवं जागरादिपर्वपरम्परायामपि प्रतिपादितेन प्रकारेण परस्परानुवेधवैचित्र्यमनुसन्धीयत इत्यासूत्र्यते। एतदुक्तं भवति—चिच्छक्तिस्वरूपो महाप्रकाशनामा परमप्रमातृरूपो

नित्योद्यन्तृतापरिस्पन्दसारो भगवांस्तुरीयातीतभट्टारकः स्वानन्दात्मकप्रचयनामधेयावच्छिन्नप्रमातृतारूपानौदासीन्यस्वभावेन तुरीयेण करणभूतेन प्रमेयं प्रमाणं प्रमात्रौदासीन्यमिति, पिण्डं पदं रूपमिति, क्रिया ज्ञानमिच्छेत्याद्यशेषत्रिकानुप्राणनमेतज्जाग्रत्स्वप्नसुषुप्तलक्षणमवस्थात्रयं प्रतिपादितालौकिकैश्वर्यपरामर्शलक्षणां योगशक्तिमाक्रम्य स्वस्वातन्त्र्यस्फुरत्तापरिस्पन्दमात्रपरमार्थमनुसन्धत्त इति। यदुक्तं श्रीशिवसूत्रेषु—'त्रितयभोक्ता वीरेशः', 'त्रिपदाद्यनुप्राणनम्' इति च। यच्चोक्तं श्रीस्पन्दे—

जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वभावादुपलब्धृतः ।। इति।।६१।।

परिपाटी = आत्मस्वरूपमयी अनन्यता, उपर्युक्त अशेष अवस्थाओं में योगी की दृष्टि सदैव आत्मोन्मुख एवं शिवभावित रहा करती है।

१. जागर—यान्येतानि जागरप्रभृतीनि कालक्रमानुप्राणनानि पर्वाण्यवस्थाविशेषाः तत्र लौकिक्या युक्त्या सर्वसाधारण्येनार्थं विषयीकृत्य बाह्याभ्यन्तरोभयेन्द्रियजन्यं जागरः।

२. स्वप्न—अन्तःकरणमात्रहेतुरसाधारणार्थनिर्माणात्माविकल्पः स्वप्नः।

३. सुषुप्ति—सर्वाकारेणार्थस्फुरणशून्यता सौषुप्तम्।

शिवसूत्रकार की दृष्टि—१. ज्ञानं जाग्रत् २. स्वप्नो विकल्पः। ३. अवि-वेको माया सौषुप्तम् (शिवसूत्र)।

प्रत्यभिज्ञाकार की दृष्टि—प्रत्यभिज्ञाकार की दृष्टि में चेतना की विविध स्थितियों का स्वरूप इस प्रकार है—

१. जागर अवस्था—

सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा।
सृष्टिः साधारणी सर्वप्रमातृणां स जागरः।।

२. स्वप्नावस्था—

मनोमात्रपथोऽप्यक्षविषयत्वेन विभ्रमात्।
स्पष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम्।।

३. सौषुप्त अवस्था—

तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम्।

योगियों की दृष्टि से देखें तो इन अवस्थाओं का स्वरूप परिवर्तित हो जायेगा क्योंकि—योगिदृष्ट्या तु धारणा-ध्यान-समाधिरूपाण्येतानि।

संयम का स्वरूप क्या है?

१. चित्तस्य देशबन्धो धारणा।

२. तत्तत्प्रत्ययप्रवाहो ध्यानम्।

३. वेद्यवेदकभावादिविगलनं समाधिः।

तुरीय का स्वरूप क्या है? तुरीयं पुनः सर्वयोगिन्यप्येकरूपतयाऽवतिष्ठते। तुरीय क्या है? त्रिषु चतुर्थं तैलवदासेच्यम् (शि. सू.)।

जाग्रदादि अवस्थात्रय में महास्फुरत्ता सदैव अनुवृत्त रहा करती है। ये अवस्थायें परस्पर में भी अनुविद्ध हैं।

भास्कारराय मखिन की दृष्टि—

१. जागरावस्था का स्वरूप—इन्द्रियदशकव्यवहृतिरूपा या जागरावस्था। तत्र प्रकाशरूपो हेतुर्भाव्यस्तृतीयगे रेफे। (वरिवस्यारहस्यम्-१.३७)

२. स्वप्नावस्था का स्वरूप—अन्तःकरणचतुष्कव्यवहारः स्वाप्निकावस्था। सा तार्तीयेकाराद्बोध्यापि गलस्थले चिन्त्या। (वरिवस्यारहस्यम्-१.३८)

३. सुषुप्त्यवस्था का स्वरूप—

अन्तरवृत्तेर्लयतो लीनप्रायस्य जीवस्य।
वेदनमेव सुषुप्तिश्चिन्त्या तार्तीयबिन्दौ सा।
(वरिवस्यारहस्यम्-१.३९)

४. तुर्यावस्था का स्वरूप—

तुर्यावस्था चिदभिव्यञ्जकनादस्य वेदनं प्रोक्तम्।
तद्भावनार्धचन्द्रादिकं त्रयं व्याप्य कर्तव्याः।।
(वरिवस्यारहस्यम्-१.४०)

५. तुर्यातीतावस्था का स्वरूप—

आनन्दैकघनत्वं यद्वाचामपि न गोचरो नृणाम्।
तुर्यातीतावस्था सा नादन्तादिपञ्चके भाव्या।।
(वरिवस्यारहस्यम्-१.४१)

महासत्ता की स्थिति एवं अवस्थायें

जाग्रदाद्यवस्थात्रयानुवृत्ता महास्फुरत्ता। (परिमल ६१, शिवसूत्र)

योगी इन चारो या पाँचों अवस्थाओं को आत्मस्वरूप का विमर्श (आत्मपरामर्श) कहते हुये उन्हें गिनता रहता है—धारणा करता रहता है।

(क) जाग्रत् = बाह्याभ्यन्तरिक ऐन्द्रिय जागृति।

(ख) स्वप्न = अन्तःकरणहेतु अर्थनिर्माण करने वाली विकल्पावस्था।

(ग) सुषुप्ति = सारे स्फुरणों की शून्यता।

ये स्थितियाँ योगियों की दृष्टि में धारणा, ध्यान एवं समाधि की अवस्थायें हैं। योगी आत्मविमर्शरूप सूत्र में जाग्रत्, स्वप्न, सुषुप्तिरूप मनकों से गुम्फित मणिमाला धारण करता है (महार्थमञ्जरी-६१)।

योगी इन चारो अवस्थाओं को मौक्तिक-माणिक्य आदि की एक सूत्र में ग्रथित विचित्र माला की भाँति अपनी स्वात्मा में स्थापित करता है।

पर्वपरिपाटी = जाग्रत्, स्वप्न, सुषुप्तिरूप पर्वों की परिपाटी (अन्योन्यरूपत्व आत्म-स्वरूपमयी अनन्यता)। परिपाटी = अन्योन्यरूपत्वे व्यवस्थात्मकत्वादेकरूपता। यही एकरूपता योगी का स्वभाव होता है और ऐसा योगी—व्याख्यातस्वभावो योगी मौक्तिक-माणिक्याद्यनेकरत्नशालिनीं हारयष्टिमिव विमर्शाख्येन सर्वानुप्रवेशप्रगल्भेनैकेन तन्तुना सङ्कलितां कुर्वन्नुद्वहति लौकिकप्रस्थानोल्लङ्घिना केनचिदुत्कर्षणं प्रापयति तत्तत्स्वरूपतापरामर्शेन स्वात्मन्यवस्थापयति।[१]

इसका अर्थ यह है कि वहाँ साधारण (लौकिक) व्यक्तियों की अवस्थाओं (जागरादि अवस्थाओं) को अतिक्रान्त करके परप्रमातृरूप तुर्यातीत स्वभाव में अवस्थित होकर अवधार्यमाण तुर्य ही यहाँ विमर्श कहा गया है, जिसके द्वारा स्रक्सूत्र न्याय से अव-स्थात्रय क्रोड़ीकृत किया जाता है।[२]

जागृति आदि अवस्थाओं में भी अनेक अवस्थायें अन्तर्व्याप्त हैं; यथा—१. जाग्र-ज्जाग्रत् २. जाग्रत्-स्वप्न ३. जाग्रत्-सुषुप्त ४. जाग्रत्तुरीय। इस प्रकार अवस्थाओं का परस्परानुवेध है। यहाँ अबुद्ध, बुद्ध, प्रबुद्ध, सुप्रबुद्ध, जाग्रत्, स्वप्न, सुषुप्ति, तुरीय के प्रतिनिधि हैं। महेश्वरानन्द इसी परस्परानुवेध को पुनः इस प्रकार रेखाङ्कित करते हुये कहते हैं—'एकस्मिन् द्वितीयम् द्वयोस्तृतीयम् त्रिषु चतुर्थम् चतुर्षु पञ्चममित्यस्यार्थस्यावश्यम्भावः।[३] तत्राबुद्धं बुद्धं प्रबुद्धं सुप्रबुद्धं जाग्रतश्चत्वारो भेदाः।[४] कहा भी गया है—

गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम्।

अवस्थाओं के उपभेद

जाग्रत् के चार भेद—

१. अबुद्ध ३. प्रबुद्ध
२. बुद्ध ४. सुप्रबुद्ध

स्वप्नस्थ व्यक्ति के भेद—

१. गतागत ३. संगत
२. सुविक्षिप्त ४. सुसमाहित

१-४. परिमल

सुषुप्त के भेद—

(गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितस्य)

१. उदित ३. शान्त

२. विपुल ४. सुप्रसन्न

(इति स्वप्नस्य, उदितं, विपुलं, शान्तं सुप्रसन्नमिति सुषुप्तस्य।)

(क) तुरीय—नैतस्यामपरा तुर्यदशा सम्भाव्यते किल।[१]

(ख) तुर्यातीत—तुर्यातीते भेद एकः सततोदितमित्ययम्।

नित्यविप्रष्टृता द्योतक सततोदित रूप वाला एक ही भेद है।

१. स्फुट २. स्फुटास्फुट एवं ३. अस्फुट भेदों के आधार पर अवस्थानभेद है।

तुर्यातीतावस्था—परिमल कहते हैं—'तुर्यातीतं तु सर्वत्रैकरूप्यादव्याकुलं स्वात्मरूपपरमभैरवस्वभावमनुभूयते। शास्त्रों में कहा गया है—

यत्त्वद्वैतभरोल्लासद्राविताशेषभेदकम् ।
तुर्यातीतं तु तत् प्राहुरित्थं सर्वत्र योजयेत्।।

जिस प्रकार माणिक्य-मौक्तिक-महानील-मरकत आदि अनेक प्रकार के मणियों से गुंफित हारयष्टि अरुण, धवल, श्यामल आदि वर्णों से वैचित्र्य-व्यतिकरोत्तर रूप में दृष्टिगत होती है तथापि वह वर्णसंसर्ग तथा एकसूत्रता के कारण विभिन्न रूप में प्रतीयमान होते हुये भी एकरूप एवं एक माला के रूप में अनुभूयमान होती है। इसी प्रकार चिच्छक्तिस्वरूप, महाप्रकाशरूप परम प्रमाता, नित्योद्यन्तृतापरिस्पन्दसारात्मक भगवान् तुरीयातीत भट्टारक हैं। ये ही स्वानन्दात्मकप्रचय, अविच्छिन्न, परप्रमाता एवं परमशिव हैं।

जाग्रत्-स्वप्न-सुषुप्ति, पिण्ड-पद-रूप, क्रिया-ज्ञान-इच्छा आदि सभी का परस्पर सम्बन्ध है। अलौकिक ऐश्वर्य परामर्शलक्षण योगशक्ति प्राप्त करके स्वस्वातन्त्र्यस्फुरत्ता परिस्पन्दमात्र परमार्थ का अनुसन्धान किया जाना चाहिये।[२]

शिवसूत्र के त्रितयभोक्तावीरेशः, त्रिपदाद्यनुप्राणनम् आदि सूत्र भी इसी दृष्टि का प्रतिपादन करते हैं।

स्पन्दकारिकाकार की दृष्टि—स्पन्दकारिका में कहा गया है कि जाग्रत्, स्वप्न एवं सुषुप्ति आदि अवस्थायें भिन्न-भिन्न हैं और चेतना इन सभी के द्वारा व्यक्त होती है; किन्तु अवस्थाओं के विभिन्न होने पर भी चेतना (आत्मा) एकरूप ही रहती है—

जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति।
निवर्तते निजात्रैव स्वभावादुपलब्धृतः।।

---

१. तन्त्रालोक २. महेश्वरानन्द (परिमल ६१)

अवस्थाओं के विषय में महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि—

१. जागृति की अवस्था = धारणा की अवस्था।
२. स्वप्न की अवस्था = ध्यान की अवस्था।
३. सुषुप्ति की अवस्था = समाधि की अवस्था।

योगिदृष्ट्या तु धारणाध्यानसमाधिरूपाण्येतानि। यानि चित्तस्य देशबन्धो धारणा, तत्तत्प्रत्ययप्रवाहो ध्यानम्, वेद्यवेदकभावादिविगलनं समाधिः।

(महेश्वरानन्द : परिमल)

तुरीयावस्था का स्वरूप क्या है? 'तुरीयं च नाम त्रिषु चतुर्थं तैलवदासेच्यम्। जाग्रदाद्यवस्थात्रयानुवृत्ता महास्फुरत्ता। यत् एकस्मिन् द्वितीयम्, द्वयोस्तृतीयम्, त्रिषु चतुर्थम्, चतुर्षु पञ्चममित्यस्यार्थस्यावश्यम्भावः।

तुर्यातीत कौन है? 'तुर्यातीतं तु सर्वत्रैकरूप्यादव्याकुलं स्वात्मरूपपरयभैरवस्वभावमनुभूयते—

यत्त्वद्वैतभरोल्लासद्राविताशेषभेदकम् ।
तुर्यातीतं तु तत् प्राहुरित्थं सर्वत्र योजयेत्।।

महेश्वरानन्द कहते हैं कि माणिक्य-महानील-मरकत आदि से गुम्फित हारयष्टि में अरुण-धवल-श्यामल आदि अनेक रंगों का वैचित्र्य (भिन्नत्व) रहता है और उनमें कोई भी समान तत्त्व नहीं रहता तथापि उनमें प्रत्येक वर्ण एक-दूसरे वर्ण से संक्रान्त होने से अविनाभाव सम्बन्ध निर्मित किये रहता है, उसी प्रकार जागर, स्वप्न, सुषुप्ति, तुरीय एवं तुरीयातीत अवस्थायें भिन्न-भिन्न तो हैं तथापि अविनाभाव रूप से सम्बद्ध हैं। ये परस्परानुविद्ध हैं।

योगियों का योग-भोगसाहचर्यवाद

ननु व्यावर्णितमेतद्देशकालादिविकल्पवैधुर्योद्धुरं शुद्धसंवित्कलाकैवल्यस्वभावं योगिनः स्वाच्छन्द्यं स्वव्यतिरिक्ताशेषदेहप्राणादिविकल्पोपश्लेषवैमुख्यशालिन एवास्योपपद्यते। तच्च न सम्भवति, यस्य कस्यचिद्विकल्पोपश्लेषस्य नित्यमवर्जनीयत्वादित्याशङ्क्याह—

उल्लोआणन्दसुहासीहुरसुव्वेइएण हिअएण ।
अहिलसइ लोअजत्तातिन्तिणिचव्वणरसन्तरं जोई ॥६२॥

(उल्लोकानन्दसुधाशीधुरसोद्वेजितेन हृदयेन।
अभिलषति लोकयात्रातिन्तिणिचर्वणरसान्तरं योगी।।)

आत्मानन्दोन्मत्त योगी आत्मानन्दरस को प्राप्त करने के अनन्तर, लोकातीत आत्मा-

नन्दामृत से उन्मत्त हृदय (मन) के द्वारा लोकव्यवहार (में प्रवेश) की उसी प्रकार इच्छा रखता है, जिस प्रकार एक मद्यपी अपने मद्य की उन्मत्तता को शान्त करने हेतु इमली चबाने की इच्छा रखता है।।६२।।

योऽयमुल्लोकः 'स एको ब्रह्मण आनन्दः' इत्युपनिषत्प्रक्रियया मनुष्य-गन्धर्वाद्यवच्छिन्नप्रमातृहृदयानन्दातिशायी पूर्णाहम्भावभावनाचमत्कारसारः स्वान्तर्विश्रान्तिसम्पत्सौन्दर्यमात्रस्वपरिस्पन्दः कश्चिदाह्लादोत्कर्षः, स खल्वमृतास-वस्वभावरसद्वयव्यतिकरकल्पनीयार्थक्रियाकारितया प्रकाशविमर्शस्वभाव-स्वरूपमाधुर्यातिशयानुभवप्रावीण्याद् योगिनो हृदयमुद्वेजयति उत्कृष्यान्यत्र स्व-प्रतियोगिनि पदार्थे प्रवर्तयति। तादृशा चायं हृदयेनोपकरणभूतेन लोकस्य देहाक्ष-भुवनादेर्या यात्रा प्रवाहनित्या प्रवृत्तिः, सा चिञ्चाफलास्वादवत् प्रागनुभूतमा-धुर्योत्कर्षापेक्षया रसान्तरमम्लादिसादृश्यादन्यो रसः सम्पद्यते। यत्रोद्वेजितहृदयस्य योगिन इच्छाशक्तिरुज्जृम्भते। योगीच्छायाश्च फलप्राप्तिपर्यन्तत्वमविप्रतिपन्नम्। यदुक्तं श्रीशिवसूत्रेषु—'चित्तस्थितिवत् शरीरकरणबाह्येषु' इति। क्षीरशर्कराद्य-त्यन्तमधुरोपयोगोद्वेजितचेतसां च पुंसां तिन्तिण्याद्यम्लपदार्थान्तराभिलाषो लोकप्रसिद्धः। अयं भावः—शरीरेन्द्रियादिवेद्यविक्षोभव्युदासेन स्वात्ममात्रसा-क्षात्कारलक्षणं सौख्यमवलम्ब्योल्लासो बहिर्विषयबिभीषिकाविक्लवात्मनः परिमितस्य योगिनश्चाकित्यप्रकारः। अपरिमितस्य तु पूर्णाहन्तापरामर्शात्मकान-वच्छिन्नानन्दपरिस्पन्दास्वादसंप्रीतात्मनः स्वात्मपक्षनिक्षिप्ताशेषबाह्यप्रपञ्चत्वादि-दन्तानुभूत्यवश्यम्भावः। ततश्च विकल्पसर्वस्वविक्षोभानुभूतिवैचित्र्योत्तर-मिदन्तापदावरोहणमप्यनवच्छिन्नाहम्भावभासुरे महति प्रमातृपर्वण्येव पर्यवस्यति। यदुक्तं श्रीक्रमसूत्रेषु—'बाह्यादन्तः प्रवेशोऽभ्यन्तराद्वा बाह्यस्वरूपानुप्रवेशः' इति। यथा च व्याख्यातं श्रीमत्क्षेमराजेन—'तत्र च बाह्याद् गृह्यमाणाद् विषयग्रामादन्तः परस्यां चितिभूमौ ग्रसनक्रमेणैव प्रवेशः समावेशो भवति, अभ्यन्तराच्चितिशक्ति-स्वरूपात् साक्षात्कृतात् समावेशसामर्थ्यादेव बाह्यस्वरूप इदन्तादिनिर्देश्ये विषयग्रामे वमनयुक्त्या प्रवेशश्चिद्रसाश्यानतात्मा समावेशो जायते' इति। यदभिप्रेत्य श्रीप्रत्यभिज्ञायामुक्तम्—

विश्वरूपोऽहमिदमित्यखण्डानन्दबृंहितः। इति।

यच्चोक्तमस्मद्गुरुभिरानन्दताण्डवविलासस्तोत्रे—

वयं त्विमां विश्वतयाऽवभानं बहिर्मुखस्यास्य तवोन्मुखस्य।
स्वसंहितं विश्वविलापनोद्यत्स्वतन्त्रतानन्दमयीं नमामः।। इति।

इदमेव हि तद् योगिनो ज्ञानस्य शुद्धत्वम्, यदिदन्तोपश्लेषेऽप्यवैयाकुल्यम्।

यदुक्तं श्रीचन्द्रज्ञाने—

येन प्रबुद्धभावेन भुञ्जानो विषयान् स्वयम्।
न याति पाशवं भावं ज्ञानचन्द्रः स कीर्तितः।। इति।

किञ्च, यद्यदुद्रिक्तमाधुर्योपयोगे तिन्तिण्याद्याकाङ्क्षा तदास्वादादेव प्रस्तुतोद्वेजनशान्त्या पुनरपि मधुरद्रव्यस्वीकारसामर्थ्यम्, एवं पूर्णाहन्तानुसन्धानादिदन्तोपलम्भावश्यम्भावः। इदन्तानुषङ्गे च तादृगहन्तानुप्रवेशस्यार्थतः सिद्धिरित्यात्मनश्चक्रकस्थित्या नित्योद्यन्तृत्वं प्रति न कश्चिद् भङ्गशङ्कावकाशः। यस्मादिदन्तानुपलब्धावहम्भावस्य राज्यभ्रष्टस्येव राज्ञः, तद्वदहमंशानुपरक्ताविदमंशस्य भागस्याराजकस्येव राज्यस्य न किञ्चिच्चमत्कारौचित्यम्। यदुक्तं शम्भ्वैक्यदीपिकायाम्—'अन्तर्गता हि प्रकाशव्याप्तिरिदमिति विश्राम्यति बहिर्गता चाहमिति, एतद्द्वयं सर्वजनप्रसिद्धमनपह्नवनीयम्' इति।।६२।।

स्वरूपानन्दोन्माद और योगी की लोकोत्तरावस्था (योगियों की अलौकिक आत्मिक रसानुभूतिजन्य मादकता)—उल्लोक = लोकातीत, अलौकिक। शीधु = ईख के पके रस से निर्मित शराब। द्राक्षा सुरा। उल्लोक + शीधु + रस = अलौकिक स्वाह्लादस्वरूप एकरस स्वविश्रान्ति। (एकरसात्मक स्वात्मानन्द में ही जाग्रत्, स्वप्न, सुषुप्ति आदि से अतीत तुरीयावस्था में योगी सदा निमग्न रहता है।) तिन्तिणि = इमली।

योगी जागतिक सुखों का उपभोग करते हुये भी स्वरूपानन्द के सुख में निमग्न रहते हैं। वे मन का उन्मनीकरण करके स्वरूपामृतात्मक एवं स्वसंवेद्य परमात्मा का निरन्तर साक्षात्कार करते रहते हैं। यही है—योगियों का योग-भोगसाहचर्यवाद।

प्रस्तुत गाथा में लोकोत्तर आत्मानन्द की असह्य उन्मत्तता को शान्त करने के लिये योगी जिस प्रकार जागतिक व्यवहार में प्रवेश करने की इच्छा व्यक्त करता है, उसकी उस मद्यपी के साथ समतुल्यता दिखाई गई है जो शराब की खुमारी दूर करने के लिये किसी अम्लरस के सेवन की आकांक्षा व्यक्त करता है। आत्मानन्द में निमग्न योगी को कितना आनन्द मिलता है, इसी का इस गाथा में वर्णन किया गया है।

उल्लोक—महेश्वरानन्द कहते हैं कि इस गाथा में उल्लोकानन्द (लोकोत्तरानन्द) का जो उल्लेख किया गया है, वह उपनिषदों में उल्लिखित 'स एको ब्रह्मण आनन्द' वाला आनन्द है। उपनिषदों में मनुष्यानन्द, गन्धर्वानन्द आदि अवच्छिन्न हृदयानन्द वाले परिमित प्रमाताओं के आनन्द को अतिक्रान्त करके शीर्षावस्थित पूर्णाहंभावनाचमत्कार रस से स्वान्तर्विश्रान्ति प्राप्त योगी जिस आह्लादोत्कर्ष की अनुभूति करता है, वह अकल्पनीय है। उस प्रकाश-विमर्शस्वभावरूप माधुर्यातिशय से परिप्लुत योगी को वह लोकोत्तरानन्दानुभूति सहन नहीं होती; अतः वह प्रतियोगी पदार्थों में निरत होने की

आकांक्षा रखता है; क्योंकि—प्रकाशविमर्शस्वभावस्वरूपमाधुर्यातिशयानुभवप्रावीण्याद् योगिनो हृदयमुद्वेजयति। अतः (लोकोत्तरानन्द प्राप्तः सः योगी) 'स्वप्रतियोगिनि पदार्थे प्रवर्तयति।'

उस योगी के आनन्द का स्वरूप कैसा होता है? महेश्वरानन्द कहते हैं—मनुष्य-गन्धर्वाद्यवच्छिन्नप्रमातृहृदयानन्दातिशायी पूर्णाहम्भावनाचमत्कारसारः स्वान्तर्विश्रान्ति-सम्पत्सौन्दर्यमात्रस्वपरिस्पन्दः कश्चिदाह्लादोत्कर्षः।

मद्यपी द्वारा मदोन्मत्तता दूर करने के लिये आसेवित इमली एवं योगी की लोकयात्रा में प्रविष्टि समतुल्य है।

(क) इमली = मदोन्मत्तता दूर करने का उपाय।

(ख) लोकयात्रा (लोकव्यवहार = जागतिक विषयासक्त जीवन) = योगी की आत्मिक खुमारी दूर करने का उपाय।

निष्कर्ष—(महेश्वरानन्द की दृष्टि)—

१. प्रकाशविमर्शस्वभावस्वरूपमाधुर्यातिशयानुभवः ..... योगिनो हृदयमुद्वेजयति। (अतः सः) उत्कृष्यान्यत्र,

२. स्वप्रतियोगिनि पदार्थे प्रवर्तयति।

योगी की लोकयात्रा एवं सांसारिक प्राणियों की लोकयात्रा में भेद

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं—

१. लोकस्य देहाक्षभुवनादेर्या यात्रा प्रवाहनित्या प्रवृत्तिः, सा चिञ्चाकलास्वादवत् प्रागनुभूतमाधुर्योत्कर्षापेक्षय रसान्तरमम्लादिसादृश्यादन्यो रसः सम्पद्यते।

२. यत्रोद्वेजितहृदयस्य योगिन इच्छाशक्तिरुज्जृम्भते।

महेश्वरानन्द कहते हैं कि क्षीर-शर्करा आदि के अत्यन्त मधुर पदार्थों के उपयोग से उद्वेजित चित्त वाले लोग इमली, अम्ल आदि पदार्थों के सेवन की इच्छा व्यक्त करते हैं—यह लोकप्रसिद्धि है।

इसी प्रकार की स्थिति आत्मिक आनन्दोत्कर्ष की मदोन्मत्तता से व्याकुल योगियों की भी होती है। उन्हें आनन्द की उन्मत्तता से मुक्ति पाने के लिये लोकयात्रा का आश्रय लेना पड़ता है।

शरीर-इन्द्रिय आदि वेद्यों के विक्षोभ से विमुक्त एवं स्वात्ममात्र-साक्षात्कार में निरत होने से लोकोत्तर सौख्य-प्राप्त योगियों को विषयभोगी जीवों की विषय-विभीषिका में रसास्वाद लेने की दृश्यावलियाँ देखकर आश्चर्य प्रतीत होता है और यही आश्चर्यजन्य मनोभंग उनके असह्य आनन्दोत्कर्ष को कम कर देता है।

पूर्णाहन्ता परामर्शात्मक अनवच्छिन्न आनन्द के परिस्पन्दास्वाद से आत्मविभोर योगी प्रापञ्चिक व्यवहार में जाने से प्रापञ्चिक एवं इदमात्मक परिमित अनुभूति भी करने लगता है। जहाँ अहमिदम्, इदमहम् आदि की ऐक्यानुभूति होनी थी, वहाँ अब अहञ्च, इदञ्च की द्वैतापेक्षी अनुभूति होने लगती है तथापि सामान्य प्राणियों एवं लोकापेक्षी सिद्ध योगियों की लोकयात्रा में भेद तो बना ही रहता है—विकल्पसर्वस्वविक्षोभानुभूतिवैचित्र्योत्तरमिदन्तापदावरोहणमण्यनवच्छिन्नाहम्भावभासुरे महति प्रमातृपर्वण्येव पर्यवस्यति।

श्रीक्रमसूत्रकार की दृष्टि—क्रमसूत्र में कहा गया है कि—बाह्यादन्तः प्रवेशोऽभ्यन्तराद्वा बाह्यस्वरूपानुप्रवेशः।

आचार्य क्षेमराज की दृष्टि—आचार्य क्षेमराज कहते हैं—तत्र च बाह्याद् गृह्यमाणाद् विषयग्रामादन्तः परस्यां चितिभूमौ ग्रसनक्रमेणैव प्रवेशः समावेशो भवति, अभ्यन्तराच्चितिशक्तिस्वरूपात् साक्षात्कृतात् समावेशसामर्थ्यादेव बाह्यस्वरूप इदन्तादिनिर्देश्ये वमनयुक्त्या प्रवेशश्चिद्रसाश्यानतात्मा समावेशो जायते।

प्रत्यभिज्ञाकार की दृष्टि—श्रीप्रत्यभिज्ञा में भी इसी बात को इस प्रकार व्यक्त किया गया है—विश्वरूपोऽहमिदमित्यखण्डानन्दबृंहितः।

आनन्दविलासताण्डवस्तोत्रकार की दृष्टि—आनन्दविलासताण्डव में भी इसी तथ्य को इस प्रकार व्यक्त किया गया है—

वयं त्विमां विश्वतयाऽवभानं बहिर्मुखस्यास्य तवोन्मुखस्य।
स्वसंहितं विश्वविलापनोद्यत् स्वतन्त्रतानन्दमयीं नमामः।।

यही योगियों के ज्ञान की शुद्धता है।

श्रीचन्द्रज्ञानकार की दृष्टि—श्रीचन्द्रज्ञान में कहा गया है कि—

येन प्रबुद्धभावेन भुञ्जानो विषयान् स्वयम्।
न याति पाशवं भावं ज्ञानचन्द्रः स कीर्तितः।।

उद्रिक्त माधुर्योपयोग में इमली आदि अम्ल पदार्थों की जो आकांक्षा होती है, उसके आस्वाद से ही प्रस्तुत उद्वेजन-शमन द्वारा पुनः मधुर द्रव्यों को स्वीकार करने की सामर्थ्य आ जाती है। इसी प्रकार पूर्णाहन्तानुसन्धान से इदन्तोपलम्भ भी हुआ करता है। उसी प्रकार इदन्तानुषङ्ग में भी अहन्तानुप्रवेश की सिद्धि हो जाती है और परिणामतः नित्योद्यन्तृत्व कभी भङ्ग नहीं हुआ करता। जिससे कि—यस्मादिदन्तानुपलब्धावहम्भावस्य राज्यभ्रष्टस्येव राज्ञः, तद्वदहमंशानुपरक्ताविदमंशस्य भागस्याराजकस्येव राज्यस्य न किञ्चिच्चमत्कारौचित्यम्।

शम्भवैक्यदीपिकाकार की दृष्टि—शम्भवैक्यदीपिका में कहा गया है—अन्तर्गता

हि प्रकाशव्याप्तिरिदमिति विश्राम्यति बहिर्गता चाहमिति, एतद्वयं सर्वजनप्रसिद्धमनपह्नवनीयम्।

योगियों का आनन्द और आनन्द-श्रेणियाँ—परमशिव की पाँच शक्तियों में द्वितीय शक्ति आनन्दशक्ति है। शैव दर्शन में स्वातन्त्र्य को ही आनन्द कहा गया है।

(क) औपनिषदिक आनन्द-मीमांसा (तैत्ति. २.८)—

सैषाऽऽनन्दस्य मीमांसा भवति।

आनन्द की ११ श्रेणियाँ



कोई यौवनावस्थापन्न हो, श्रेष्ठ आचरण वाला हो, वेदाध्यायी हो, शासन-पारङ्गत हो, द्रढिष्ठ बलिष्ठ, वित्तपूर्ण, समस्त पृथ्वी का शासक हो, उसकी आनन्दाप्ति = १ मानुषानन्द है।

१. समस्त पृथ्वी का शासक हो—उसकी आनन्दाप्ति = १. मानुषानन्द है।

२. १०० मानुषानन्द = १ मनुष्यगन्धर्वानन्द।

३. १०० मनुष्यगन्धर्वानन्द = १ देवगन्धर्वानन्द।

४. १०० गन्धर्वानन्द = १ पितरानन्द।

५. १०० पितरानन्द = १ आजानज देवानन्द।

६. १०० आजनज देवानन्द = १ कर्मदेवानन्द।

७. १०० कर्मदेवानन्द = १ देवानन्द।

८. १०० देवानन्द = १ इन्द्रानन्द।

९. १०० इन्द्रानन्द = १ बृहस्पत्यानन्द।

१०. १०० बृहस्पत्यानन्द १ प्रजापत्यानन्द।

११. १०० प्रजापत्यानन्द = १ ब्रह्मानन्द।

ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य।
(तैत्तिरीयोपनिषद्)

(११) ब्रह्मानन्द
(१०) प्रजापत्यानन्द
(९) बृहस्पत्यानन्द
(८) इन्द्रानन्द
(७) देवानन्द
(६) कर्मदेवानन्द
(५) आजानजदेवानन्द
(४) पितरानन्द
(३) देवगन्धर्वानन्द
(२) मनुष्यगन्धर्वानन्द
(१) मानुषानन्द

आनन्द—आनन्दो ब्रह्मेति व्यजानात्।

१. आनन्द ब्रह्म है।
२. आनन्द सृष्टि का मूल केन्द्र है।
३. आनन्द आत्मा है।
४. आनन्द और चैतन्य आत्मा का स्वभाव है।
५. आनन्द से समस्त प्राणियों की उत्पत्ति होती है। उसी में सभी का लय होता है।
६. सच्चिदानन्द पद के अनुसार आनन्द ब्रह्म का एक स्वभाव है।

(ख) शतपथब्राह्मण (१४.७.१.३१) **के अनुसार आनन्दों का श्रेणी-वर्गीकरण—**

ब्रह्मलोक से लेकर समस्त लोक पुनरावर्ती स्वभाव वाले लोक हैं; किन्तु परमात्म-प्राप्त साधकों का पुनरावर्तन नहीं होता—गीता।

१०० मनुष्यानन्द = १ पितरानन्द।

१०० पितरानन्द = १ कर्मदेवानन्द।

१०० कर्मदेवानन्द = १ आजानज देवानन्द।

१०० आजानज देवानन्द = १ देवानन्द।

१०० देवानन्द = १ गन्धर्वानन्द।

१०० गन्धर्वानन्द = १ प्रजापत्यानन्द।

१०० प्रजापत्यानन्द = १ ब्रह्मानन्द।

(ग) बृहदारण्यकोपनिषदकार की दृष्टि—

बृहदारण्यकोपनिषद् में आनन्द-श्रेणी का वर्गीकरण इस प्रकार किया गया है—

बृहदारण्यकोपनिषद् (४.३.२)

ब्रह्मलोक की स्थिति सर्वोच्च आनन्द की स्थिति है; किन्तु गीताकार (८.११६) कहते हैं—



आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।।

= १०० मनुष्यानन्द



(घ) माहेश्वरतन्त्रकार की दृष्टि—

आनन्द की चतुर्दश श्रेणियाँ




उपदेवानन्द = १०० पित्रानन्द
देवानन्द = १०० उपदेवानन्द
वैरञ्च्यानन्द = १०० देवानन्द
पुरुषानन्द = १०० प्रकृत्यानन्द
वैष्णवानन्द = १०० वैरञ्च्यानन्द
अक्षरानन्द = १०० पुरुषानन्द
रुद्रानन्द = १०० वैष्णवानन्द
ब्रह्मानन्द = १०० अक्षरानन्द
ईशानन्द = १०० रुद्रानन्द
शैवानन्द = १०० ईशानन्द
प्रकृत्यानन्द = १०० शैवानन्द

ब्रह्मानन्दमयं विश्वं नानाभावो न विद्यते।
मायोपाधिसमायोगात् नानात्वेन प्रतीयते।। (माहेश्वरतन्त्र)

वितर्कानुगत समाधि से उच्चतर विचारानुगत सम्प्रज्ञात समाधि में सूक्ष्मतरत्व के तारतम्य से भी आनन्दों में अन्तर है। सर्ग-वर्गीकरण की दृष्टि से भी आनन्दों में अन्तर है; यथा—



यह भी ध्यातव्य है कि—१. बृहदारण्यकोपनिषद् २. तैत्तिरीयोपनिषद् ३. शतपथ-ब्राह्मण एवं ४. माहेश्वर तन्त्र में उल्लिखित आनन्दश्रेणियों में प्रकृतिलयों एवं विदेहों के आनन्द का वर्णन नहीं किया गया है; क्योंकि ये आनन्दश्रेणियाँ केवल योगियों की हैं।[१]

योगियों के आनन्द-स्तर



प्रकृतिलयों एवं विदेहों का आनन्द ६ सर्गों की अपेक्षा अधिक है।

विदेहों का स्तर—विचारानुगत समाधि से उच्चतर आनन्दानुगत समाधि की भूमि तक है। ये शरीराभिमान-शून्य भूमि हैं।

प्रकृतिलयों का स्तर—प्रकृतिलय विदेहों की भूमि से भी उच्चतर भूमि में अवस्थित हैं, अत: उनकी स्थिति अस्मितानुगता भूमि में है, अत: प्रकृतिलय अहङ्कार का अभिमान भी परित्यक्त करके स्थित हैं।

---

१. योगभाष्य में व्यास जी कहते हैं—विदेह और प्रकृतिलय योगी कैवल्यतुल्य स्थिति में होते हैं; अत: वे किसी दिव्य लोक में निवास करने वालों से उच्चतर हैं।

आनन्द-श्रेणियाँ और चतुर्दशात्मक सर्ग

(ब्रह्मादिस्तम्ब पर्यन्त सृष्टि का वर्गी-करण)

सर्ग-वर्गीकरण (सांख्यदर्शन)


८ प्रकार का दैव सर्ग
१ प्रकार की मानुषी सृष्टि
मानुष सर्ग
तिर्यक् सृष्टि (तिर्यक् सर्ग)
ब्राह्म प्राजापत्य ऐन्द्र दैव गन्धर्व पित्र्य विदेह प्रकृतिलय
(कर्मोपासना के फलस्वरूप प्राप्त लोक)
पशु पक्षी सरीसृप जन्तु कीट स्थावर

प्राणियों की सृष्टि को १४ वर्गों में विभाजित किया गया है, जिसमें—१. दैव-सर्ग (८) २. मनुष्य (१) एवं तिर्यक् सर्ग (५) = ८ + १ + ५ = १४ प्रकार की सृष्टि।

१. चतुर्दशविधो भूतसर्ग:।[१]

२. अष्टविकल्पो दैवस्तैर्यग्योनिश्च पञ्चधा भवति।
मानुष्यश्चैकविध: समासतो भौतिक: सर्ग:।।

१. ऊर्ध्वगतीं सर्ग = देवसर्ग = सत्त्वगुणप्रधान (८ प्रकार)।

२. मध्यवर्ती सर्ग = मानुष सर्ग = रजोगुणप्रधान (१ प्रकार)।

३. अधोवर्ती सर्ग = सरीसृप, कीट, पशु, पक्षी, स्थावर = तमोगुणप्रधान (५ प्रकार)।

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलत: सर्ग:।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्त:।।
ईश्वरकृष्ण—सांख्यकारिका (५३-५४)



समाधि की विभिन्न भूमियों में भी आनन्द का तारतम्य पृथक्-पृथक् होता है। वितर्क 'विचार' आनन्द एवं अस्मिता (सं. स.) तथा असम्प्रज्ञात समाधियों में भी आनन्द की विभिन्न श्रेणियाँ हैं।

१. पाँचों स्थूल पञ्चमहाभूत, स्थूल शरीर, स्थूल इन्द्रियों की भावना से अभिभूत = वितर्कानुगत सम्प्रज्ञात समाधि।

२. सूक्ष्म तन्मात्राओं, सूक्ष्म पञ्चमहाभूतों एवं सूक्ष्म विषयों की भावना से अभिभूत = विचारानुगत सम्प्रज्ञात समाधि।

१. महर्षि कपिल (तत्त्वसमास-१८)

३. अहमिति वृत्ति वाली अहंकार की भावना से युक्त आनन्दानुगत सम्प्रज्ञात समाधि = आनन्दानुगत सम्प्रज्ञात समाधि।

४. 'अहमिति' अहंकार से परे = अस्मितानुगत सम्प्रज्ञात समाधि।

५. अस्मिता वृत्ति वाली अस्मिता भावना से युक्त = अस्मितानुगत असम्प्रज्ञात समाधि।

६. आनन्दानुगता भूमि में आसक्त योगी का देहपात—विदेहदेहत्व की प्राप्ति = भव-प्रत्यय।

अस्मितानुगत भूमि में आसक्ति वाले योगी ही (अस्मिता) प्रकृतिलय देवपद प्राप्त करते हैं; न कि तन्मात्राओं एवं अहंकार की भावना से युक्त = भवप्रत्यय।

७. विचारानुगत समाधिप्राप्त योगी एवं आनन्दानुगत समाधिप्राप्त योगी = उपायप्रत्यय।

देवलोक और विदेह तथा प्रकृतिलय : आनन्द का तारतम्य

१. सारे दिव्य लोक-लोकान्तरों के देवों की अपेक्षा विदेह और प्रकृतिलय श्रेष्ठतर हैं; अतः उनके आनन्दों की श्रेणियाँ भी देवलोक से श्रेष्ठतर हैं और ये कैवल्य पद के तुल्य स्थिति में हैं।

२. विदेह एवं प्रकृतिलय देवों की कैवल्यपद-जैसी स्थिति को असम्प्रज्ञात समाधि कहना भी ठीक नहीं है; क्योंकि असम्प्रज्ञात समाधि तो स्थूल देह से सर्ववृत्ति-निरोध द्वारा प्राप्त की जाती है।

यह भूमि तो सम्प्रज्ञात समाधि की उच्चतर एवं उच्चतम भूमि है, जिनमें चित्त इन दोनों एकाग्रतारूप सात्त्विक वृत्तियों में परिणत हो रहा है। ये भवप्रत्यय समाधि वाले हैं, न कि उपायप्रत्यय वाले। योगभ्रष्टों की समाधि भवप्रत्यय कहलाती है।

आनन्दानुगता समाधि—इसमें अहङ्कार का साक्षात्कार हुआ करता है। यह अहङ्कार-साक्षात्कार अन्य सूक्ष्म विषयों के समतुल्य नहीं है; क्योंकि अहङ्कार, तन्मात्राओं तक समस्त सूक्ष्म विषयों एवं उनको विषय करने वाली ज्ञानेन्द्रियों का स्वयं उपादान कारण है। इसमें सत्त्व-बाहुल्य है। सत्त्वगुण में ही आनन्द है।

इस भूमि में सूक्ष्म शरीर एवं सूक्ष्म विषयों से परे अहमस्मि वृत्ति के द्वारा केवल आनन्द का ही अनुभव होता है। गीताकार कहते हैं—

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते।।

इस आनन्दानुगत समाधि का भी त्याग कर देना चाहिये और आत्मसाक्षात्कारार्थ

प्रयास करना चाहिये अन्यथा आनन्दानुगत भूमि में स्थित योगी को मरने पर विदेहावस्था प्राप्त होती है।

विदेहावस्था एवं ब्रह्मलोकपर्यन्त सूक्ष्म लोकों का आनन्द—विदेहावस्था तो विचारानुगत भूमि में बताये गये ब्रह्मलोकपर्यन्त सूक्ष्म लोकों से अधिक सूक्ष्म, अधिक आनन्द एवं अधिक अवधि वाले हैं तथापि बन्धनस्वरूप हैं।

आनन्द ब्रह्म का पर्याय है तथापि यह भी ध्यातव्य है कि आनन्द का प्रकट हो जाना मुक्ति नहीं है—नानन्दाभिव्यक्तिर्मुक्तिर्निर्धर्मत्वात् (सांख्य-५.७४)।

यह आनन्द अन्तःकरण का धर्म है, आत्मा का नहीं।

योगियों के विषय-सौख्य और उनके द्वारा त्रैलोक्य-स्फुरण

नन्विदन्ताया मायीयत्वावश्यम्भावादुद्भावितोऽयमहन्तेदन्तयोरविशेषः कथं सङ्गच्छतामित्याशङ्क्याह—

जाहिं गह्णइ जोई कलणपणालीहि विसअसोक्खाइं ।
णिअहिअउव्वमरीहिं फुरणमअं ताहि कुणइ तेल्लोक्कं ॥६३॥

(याभिर्गृह्णाति योगी करणप्रणालीभिर्विषयसौख्यानि।
निजहृदयोद्वमनशीलाभिः स्फुरणमयं ताभिः करोति त्रैलोक्यम्॥)

अपने हृदय के उद्वमनशील इन्द्रिय-मार्गों से योगी विषयसुखों का ग्रहण करता है; उन्हीं से वह तीनों लोकों को स्फुरित करता है॥६३॥

प्रकृत्या परमप्रमातृपदाधिरूढोऽपि स्वेच्छामात्रेणोपाधिना परिमितप्रमातृभावमवतरन् अत एव प्रकाशानन्दसामरस्यामृतमहाह्रदायमानो योगी याभिरन्तर्बहिरिन्द्रियशक्तिलक्षणाभिः प्रवाहोपायप्रक्रियाभिः शब्दस्पर्शादिविषयवपूंषि सौख्यानि गृह्णाति आत्मसात्करोति, ताभिरेव पानीयपानोपक्रमप्रक्षरितवमथुशीकरस्तिम्यत्स्तम्बेरमहस्तपुष्करन्यायाद् व्याख्यातरूपमात्महृदयमनवरतमुद्वमन्तीभिः प्रमातृप्रमाणप्रमेयपरमार्थमेतत् त्रैलोक्यं स्वहृदयलक्षणस्फुरत्तात्मकं विधत्ते। अयं भावः—योगी ह्यात्मनः परप्रमातृभावं परिमितप्रमातृतायामन्तःकरणेष्वेतानि बहिरिन्द्रियेषु तानि च चैत्यभूमावुद्वमन्ननयैव नाड्या प्रमात्रादित्रिकमयमखिलमपि लोकवैचित्र्यं स्वात्मसंविदाश्यानतास्वभावमाधत्ते। यदुक्तं श्रीचिद्गगनचन्द्रिकायाम्—

मातृमेयमितिसाधनात्मिका त्वत्कृतोन्मिषति या विकल्पधीः ।
त्वत्स्वरूपमकलङ्कितं तया कस्य देवि! विदुषो न मुक्तता ।। इति।

एवञ्च विश्वग्रसनयुक्त्या स्वाह्लादलाभानुभूतिमत्स्वसंविद्वमनमुद्रया तस्य मायीयतादोषशङ्काप्यपमृज्यत इति तात्पर्यार्थः। 'तिउडिमअं खु समत्थ' इत्यादि-कायां गाथायां प्रमात्रादित्रितयात्मनः प्रपञ्चस्य चिन्मयत्वमुन्मीलितम्। अत्र तु तस्य चिन्मयत्वादेव हेतोर्मायीयतारूपापवादपर्युदास इति विशेषः।।६३।।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि परमप्रमातृपदाधिरूढ़ होने पर स्वेच्छामात्र उपाधि से परिमितप्रमातृभाव में अवतरित होकर; अतः प्रकाशानन्द सामरस्यामृत से महाह्लदायमान योगी जिन बाह्येन्द्रियों की शक्तियों से शब्द-स्पर्श-रूप-रस-गन्धरूप सौख्य प्राप्त करता है, उन्हीं से स्फुरणशील शक्तियों से तीनों लोकों को स्फुरित (चमत्कृत) कर देता है। समस्त विश्व-विलास योगी के स्वात्मभाव से सम्पन्न हो उठता है। वह प्रमातृ-प्रमाण-प्रमेय वाले त्रैलोक्य को स्वह्रदलक्षणस्फुरत्तात्मक बना देता है।

योगी अपने परप्रमातृभाव को, परिमितप्रमातृता वाले अन्तःकरण को, बहिरिन्द्रियों को, चैत्यभूमि को एवं प्रमाता-प्रमेय-प्रमाण वाले अशेष लोकवैचित्र्य को स्वात्मसंविदाश्यनता स्वभाव से आक्रान्त कर देता है।

२. चिद्गगनचन्द्रिकाकार की दृष्टि—चिद्गगनचन्द्रिका में कहा गया है कि—

मातृमेयमितिसाधनात्मिका त्वत्कृतोन्मिषति या विकल्पधीः।
तत्स्वरूपमकलङ्कितं तया कस्य देवि! विदुषो न मुक्तता।।

विश्वग्रसन-युक्ति द्वारा स्वाह्लाद-प्राप्ति की अनुभूति से युक्त स्वसंविद् वमन मुद्रा के द्वारा उसके मायीय मल के दोष नष्ट हो जाते हैं।

ये गाथायें प्रमाता-प्रमेय-प्रमाण के रूप में अवस्थित प्रपञ्च को चिन्मयत्व की धारा से आपूरित कर देते हैं।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं—गाथायां प्रमात्रादित्रितयात्मनः प्रपञ्चस्य चिन्मयत्वमुन्मीलितम्।

यही त्रिपुटी का चिन्मयत्व या सर्वचिन्मयवाद शैवागम का लक्ष्य है। जहाँ चैतन्य है, वहाँ आनन्द भी है।

सर्वानन्दवाद—तैत्तिरीयोपनिषद् (वल्ली २, अनु. ४) में कहा गया है कि सृष्टि का जो मूल केन्द्र ब्रह्म है, वह स्वयमेव आनन्दस्वरूप है और 'आनन्दं ब्रह्मणो विद्वान् न विभेति कदाचन' अर्थात् उस आनन्दरूप को जानने वाला व्यक्ति कभी भयत्रस्त नहीं होता।

आत्माऽनन्दमयः। ·····आनन्द आत्मा (२.५)।
रसो वै सः। रस ह्येवायं लब्ध्वाऽऽनन्दीभवति (वल्ली-२, अनु. ७)।
आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन

जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या परमे व्योम्नि प्रतिष्ठिता (तैत्तिरीयोपनिषद्-३.६)।

स्वस्वरूपावस्थान और विवेक

नन्विदं योगिनां नैश्चिन्त्यमाणवाद्युपायसव्यपेक्षतया विकल्पकक्ष्योल्लङ्घनक्षमत्वादनैश्चिन्त्यपक्षमनुप्रविशतीत्याशङ्क्याह—

जह तुह ठिई तहच्छसु णिच्चिन्तोत्ति हु पडिट्ठिओ अत्थो।
तत्थ वि अत्थि विवेओ एव्वं उवदिसइ तस्स को अण्णो ॥६४॥

(यथा तव स्थितिस्तथास्स्व निश्चिन्त इति खलु प्रतिष्ठितोऽर्थः।
तत्राप्यस्ति विवेक एवमुपदिशति तस्य कोऽन्यः।।)

जैसी तुम्हारी स्थिति है, उसी प्रकार स्वस्वरूप में निश्चिन्त रहते हुये स्थित एवं प्रतिष्ठित रहो—यही प्रतिष्ठित अर्थ है। वहाँ भी विवेक उन्मिषित है। इस प्रकार का उपदेश भला योगी के अतिरिक्त अन्य कौन कर सकता है?।।६४।।

यद्यप्याणवाद्युपायानां भेदप्रथानुप्राणनतया विकल्पपर्वानुप्रवेशः, तथाप्याणवे विकल्पौल्बण्यम्। शाक्ते तस्य स्फुरत्तामात्रम्। शाम्भवे तु निर्विकल्पत्वमित्युत्तरोत्तरपर्वानुशीलनादुक्तरूपमेषां नैश्चिन्त्यमव्याहतम्। यत् पुनः शाम्भवेऽप्युपायसामान्यानुप्रवेशात् सूक्ष्मेक्षिकया किञ्चिद्विकल्पशङ्काया अवर्जनीयत्वम्, तदपि निरुपायपर्वसन्निकर्षादत्यन्तशुद्धसंविन्मयं सत् पर्यन्ततो विकल्पवार्तानभिज्ञतायां पर्यवस्यति। तथाहि—

यथा स्थितस्तथैवास्स्व मा गा बाह्यमथान्तरम्।
केनचिच्चिद्विकासेन विकारनिकरान् जहि।।

इति स्थित्या तवोपदेशस्य येन प्रकारेण स्थितिर्वृत्तिर्भवति, तेनैव प्रकारेण विकल्पलक्षणां चिन्तामतिक्रामन्नास्स्व अव्याकुलं वर्तस्वेति योऽयमुपायभूमिलक्षणोऽर्थः स खल्वाणवादिक्रमोल्लङ्घनेन प्रतिष्ठितः शाम्भवतात्मना पार्यन्तिक इत्याख्यायते। तत्रापि कश्चिद् विवेकोऽस्ति। पर्यालोचनया कयाचिद् भाव्यम्। यदुत एवमित्युपपादितया भङ्ग्या योऽयमुपदेशो रहस्यार्थप्रख्यापनम्, स खल्वास्स्वेत्यादेर्विध्यर्थस्य स्वान्यविभागरूपभेदजीवितत्वात् किंकर्मकः किंकर्तृको वा स्यादित्युभयथापि भवितुं नार्हति, तं प्रति कर्मकर्तृभूतयोरुपदेश्योपदेशकयोर्वस्तुवृत्त्या भेदाभावात्। नन्वेवमादि(कादि?)भेदभिन्नोऽनन्तप्रकारस्तत्तत्तन्त्रवर्ती कल्पनप्रपञ्चः कथमिति चेत्? उपचारादिति ब्रूमः। यद् व्याख्यातमाचार्याभिनवगुप्तपादैः श्रीत्रिंशिकाशास्त्रारम्भे—'श्रीदेव्युवाचेत्यादौ स्वात्मदेवतैव

प्रबुध्यमानावस्थायामात्मानं परामर्शेनानवरतं पृच्छति' इत्यादि। यच्चोक्तं श्री-स्वच्छन्दे—

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।

इत्यादि। ततश्च योगिनामेतदकुतोभयत्वं स्वभावभूतमिति तात्पर्यार्थः। सर्वाकारोल्लसत्पारमेश्वरप्रकाशपरामर्शैकात्म्यपावने प्रपञ्चे स्वात्मानं प्रत्यवधाना-ऽनवधानादेर्विकल्पकल्पनाप्रकारस्य पर्यन्ततो निष्प्रयोजनत्वात्। तदुक्तं श्री-तन्त्रालोके—

त्यजावधानानि ननु क्व नाम धत्सेऽवधानं चिनुहि स्वयं तत्।
पूर्णेऽवधानान्नहि नाम युक्तं नापूर्णमभ्येति च सत्यभावः ।। इति।

किञ्च, एवमुपदिशति कस्य कोऽन्य इत्यनेन सर्वोऽयमुपदेशप्रकारस्तत्त्व-दृष्टावतात्त्विकीं भुवमवगाहत इत्यासूत्र्यते। यतः स्वात्मपरमेश्वरस्य पूर्णत्वोपपत्त्या प्रकारकल्पनानुपपत्तेर्यथा तथेत्यनयोर्वैयर्थ्यम्। बाह्याभ्यन्तरात्मनो विभागस्यानु-पपत्त्या तन्निबन्धनस्य—

चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः।

इति नीत्या गमागमरूपस्यार्थस्यावास्तवत्वात् तत्प्रतियोगिनोः स्थानास-नयोरौपचारिकत्वमविप्रतिपन्नम्। 'पुरुषश्चोत्तमावधि' इति न्यायादहमर्थव्यतिरेकेण युष्मच्छब्दार्थस्यासत्कल्पत्वं चापरिहार्यम्। 'क्वचित् सतः क्वचिन्निषेधः' इति स्थित्या चिन्ताया एवाभावात् तन्निषेधरूपनैश्चिन्त्यं च न प्रामाण्यमनुभवति। एवमास्स्वेत्यादेरप्रवृत्तप्रवर्तनात्मनो विधिरूपस्यार्थस्यात्रासङ्गतत्वमित्यादि स्वयमूह्यम्।।६४।।

साधक को चाहिये कि वह निःशंक एवं अभय होकर रहे। ऐसा नहीं होना चाहिये कि वह कभी प्रपञ्चानुरक्त होकर बहिर्मुख रहे और कभी आत्मोन्मुख होकर अन्तर्मुख रहे। यह स्थिति तो मानसिक अस्थैर्य की द्योतक है। संकल्प-विकल्पात्मक स्थिति में चित्त कभी एकाग्र एवं आत्मोन्मुख नहीं हो सकता। विवेक का उदय विकल्पहीन अवस्था में ही सम्भव है।

निश्चिन्तावस्था ही योगी का स्वभाव है। यही आत्मप्रतिष्ठा है। शिवस्वरूप स्वात्मा में (स्वसंवेद्य परमतत्त्व में) प्रतिष्ठित होना ही साधना का लक्ष्य है। चिद्विकास का अबाधित व्यापार इस लक्ष्य का सोपान है। विकल्पशून्य एवं चिन्तारहित रहना ही विवेक है, जो कि आकुलता एवं भय का प्रतिपक्षी है। 'सर्वं शिवमयं' की अनुभूति ही इस विवेक का उपाय है।

महेश्वरानन्द कहते हैं कि आणवोपाय में विकल्पों का औल्बण्य है। औल्बण्य

(उल्बण + ष्यञ्) = अधिकता। अत्यधिक्य तीव्रता, तीक्ष्णता, विषमता, अत्यन्त तीक्ष्णता। महेश्वरानन्द उपायों पर प्रकाश डालते हुये कहते हैं कि आणवोपाय विकल्प-प्रधान है—

यद्यप्याणवाद्युपायानां भेदप्रथानुप्राणनतया विकल्पपर्वानुप्रवेशः तथाप्याणवे विकल्पौल्बण्यम्।

शाक्तोपाय—शाक्ते तस्य स्फुरत्तामात्रम्।

शाम्भवोपाय—शाम्भवे तु निर्विकल्पत्वमित्युत्तरोत्तरपर्वानुशीलनादुक्तरूपमेषां नैश्चिन्त्यमव्याहतम्।

यतः पुनः शाम्भवेऽप्युपायसामान्यानुप्रवेशात् सूक्ष्मेक्षिकया किञ्चिद्विकल्पशङ्कायां अवर्जनीयत्वम् तदपि निरुपायपर्वसन्निकर्षादत्यन्तशुद्धसंविन्मयं सत् पर्यन्ततो विकल्पवार्तानभिज्ञतायां पर्यवस्यति।

इसी दिशा में कहा गया है कि—

यथा स्थितस्तथैवास्स्व मा गा बाह्यमथान्तरम्।
केनचिच्चिद्विकासेन विकारनिकरान् जहि।।

योगियों के द्वारा जो विवेकापन्न उपदेश दिया गया है, वह जिस प्रकार भी स्थायी हो सके, वही करना चाहिये। महेश्वरानन्द कहते हैं—उपदेशस्य येन प्रकारेण स्थिति-वृत्तिर्भवति तेनैव प्रकारेण स्थित्या विकल्पलक्षणां चिन्तामतिक्रामन्नास्स्व अव्याकुलं वर्तस्व।

सारांश यह कि विकल्पापन्न चिन्ताओं को अतिक्रान्त करते हुये अव्याकुल बनो। जो इस उपायभूमि में (आणवोपाय को अतिक्रान्त करके) स्थित है, वही प्रतिष्ठित है। 'इह खलु प्रतिष्ठितोऽर्थः' (गाथा ६४) का यही अर्थ है। इसे ही 'शांभवतात्मना पार्यन्तिक' कहा गया है। वहाँ भी कोई विवेक है। उपदेश = रहस्यार्थप्रख्यापन।

अभिनवगुप्त त्रिंशिकाशास्त्र में कहते हैं कि—श्रीदेव्युवाचेत्यादौ स्वात्मदेवतैव प्रबुध्यमानावस्थायामात्मानं परामर्शेनानवरतं पृच्छति।

स्वच्छन्दागम में कहा गया है कि—

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।

दोनों स्वभावभूत हैं तो भय कहाँ है? पारमेश्वरप्रकाशपरामर्श से एकात्म्य प्राप्त करने पर अधिगत पावनता की स्थिति में प्रपञ्च में अपने प्रति अवधानानवधान आदि विकल्पकल्पना निष्प्रयोजन है।

तन्त्रालोककार की दृष्टि—अभिनवगुप्तपाद कहते हैं—

त्यजावधानानि ननु क्व नाम धत्सेऽवधानं चिनुहि स्वयं तत्।
पूर्णेऽवधानान्नहि नाम युक्तं नापूर्णमभ्येति च सत्यभावः।।

स्वात्मपरमेश्वर की पूर्णत्वापपत्ति की स्थिति में कल्पनाओं का कोई महत्त्व नहीं है। बाह्याभ्यन्तर की एकता की स्थिति में तो—

चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः।

यदि अहं प्रत्यय नहीं है तब भला युष्मत् प्रत्यय की सम्भावना क्या है? उसके हटाने की सार्थकता क्या है?

योग-भोगसाहचर्यात्मक यामली सिद्धि

इत्थमत्याश्चर्यं नैश्चिन्त्यशालिनां योगिनां स्वभावमनुसन्दधानस्तन्त्रकृत् स्वात्मनोऽपि तेभ्यो वैलक्षण्याभावात् तत्तादृक्स्वभावतापरामर्शमांसलमाह्लादातिशयमनुभवन्नेतदावेशवैवश्योद्रिक्तस्वसंविदाटोपगौरवोच्चलच्चित्तवृत्तिश्चमत्कारोत्तरमाह—

ओ संसारसुहेल्लो ओ सुलहं मोक्खमग्गसोहग्गं।
खुडिआअङ्ककलङ्का ओ सिवजोईणं जामलो सिद्धो ॥६५॥

(अहो संसारसुखातिशयः अहो सुलभं मोक्षमार्गसौभाग्यम्।
त्रुटितातङ्ककलङ्का अहो शिवयोगिनां यामली सिद्धिः॥)

अरे! कितने हर्ष की बात है कि जगत् का सर्वातिशायी सुख भी प्राप्त है (और इसके साथ ही साथ) मुक्ति-मार्ग का सौभाग्य भी। इनमें समस्त प्रकार के आतंकों का कालुष्य भी नष्ट हो चुका है। अहा! कितने सौभाग्य का विषय है कि शैव योगियों को भोगात्मिका एवं (मुक्तिगर्भित) सामरस्यात्मिका—दोनों प्रकार की सिद्धियाँ प्राप्त हैं॥६५॥

आश्चर्यं खल्वयं संसारलक्षणः सुखातिशयः, यो जननमरणादिरूपतया बाह्यजनं प्रति क्लेशात्मकः। तथा हेयतया निश्चीयमानोऽपि मोक्षप्रायतयाऽस्माभिरास्वाद्यते। यदुक्तं श्रीमत्स्तोत्रावल्याम्—

दुःखान्यपि सुखायन्ते विषयमप्यमृतायते।
मोक्षायते च संसारो यत्र मार्गः स शाङ्करः॥ इति।

आश्चर्यं चेदं मोक्षलक्षणस्य सर्वजनमृग्यमाणस्य परमेश्वरानुग्रहैकलभ्यस्यार्थस्य सौभाग्यं हृदयहारित्वं प्रति सौलभ्यम्—

अदृष्टमण्डलोऽप्येतत् तिलाद्याहुतिवर्जितम्॥

इति श्रीत्रिंशिकाशास्त्रादिन्यायादायासशून्यमनुभवनम्, यदलिपिशिताद्युपभोगादुत्पद्यते। यदुक्तं श्रीमहावनमुनिना—

अलिपिशितपुरन्ध्रीभोगपर्याकुलोऽहं
बहुविधकुलयोगारम्भसम्भावितोऽहम् ।
पशुजनविमुखोऽहं भैरवीसंश्रितोऽहं
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम् ।। इति।

इत्थमेकैकप्राधान्येऽप्यन्योन्याविवियोगरूपमौचित्यमुपलाल्य तयोस्तुलाधारणवदत्य(न्त?न्ता)वैषम्यलक्षणमैकात्म्यं हेतुप्रयुक्त्योपबृंहयन्नाह—त्रुटितातङ्केत्यादि। शिवयोगिनो नाम—

न ध्यायतो न जपतः स्याद् यस्याविधिपूर्वकम् ।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम् ।।

इति श्रीमत्स्तोत्रावलिस्थित्या प्राणधारणाद्युपरोधव्यतिरेकेण प्रकाशात्मना शिवेन सह भूम्ना प्रशंसया नित्ययोगेन च योगं विमर्शात्मानं सम्बन्धमश्नुवाना महात्मानः। तेषां या सिद्धिः स्वस्वभावचमत्काराकारा स्फुरत्ता, सा यामली न कदाचिद् वेद्यवेदकद्वितयसृष्टिस्वरूपामुभयस्वरूपतामतिक्रामति।

यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तदन्तः कालयोगेन सोमसूर्यौ प्रकीर्तितौ ।
ज्ञानक्रियात्मनोः शम्भुमरीच्योर्मेलनात्मकम् ।

इत्यनेकाम्नायप्रक्रियया सङ्कोचविकासरूपज्ञत्वकर्तृत्वापरपर्यायप्रकाशविमर्शसामरस्यात्मकं यामलोल्लासस्वभावत्वमागमेष्वाम्नायते। तदुक्तमाचार्याभिनवगुप्तनाथपादैः—'तत्र ज्ञाता नामोन्मेषनिमेषलक्षणेन सङ्कोचविकासात्मना ज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसार एव' इति। अस्य च यामलस्यैका कोटिः परभैरवसंवित्स्वातन्त्र्यपर्यन्तम्, अन्या चात्यन्तजडघटादिप्रकाशपर्यन्तं परिस्फुरति, यत् स्वात्मपरमेश्वरस्योदयविश्रमणस्वभावम्। 'अ इति ब्रह्म तत्रागतमहम्' इत्यैतरेयोपनिषत्प्रक्रियया नित्योदितोद्योगस्वभावं शिवशक्तिमेलापरूपं रुद्रयामलमित्याख्यायते। तदुक्तं श्रीत्रिंशिकाशास्त्रे—'इत्येतद् रुद्रयामलम्' इति। अत्र हेतुस्त्रुटितातङ्ककलङ्कत्वम्। आतङ्को हि शङ्कानिबन्धनं चाकित्यम्। शङ्का च सन्देहविप्रतिपत्त्याद्यनुप्राणनतया सकृद्विभातस्वभावस्वात्मसंविदैकरस्यास्वादं प्रति प्रत्यूहतयाऽनुभूयते। तस्य चैतत् कलङ्कत्वं यत् स्वच्छेऽपि स्वात्मनि मालिन्यशङ्काऽनुप्रवेश्यते। तादृशश्चायमातङ्कस्त्रुट्यति। स्ववासनापर्यन्तं प्रणश्यति। तदा प्रतिपादितसिद्धिलाभ इति तात्पर्यार्थः। तदुक्तमाचार्याभिनवगुप्तपादैः—'न त्वत्र विद्याव्रतादि किञ्चित् सहकारिभावेनोपयोगि। केवलं परीक्षणशङ्कातङ्कत्वमत्रोपयोगि' इति। ओ इत्याश्चर्यद्योतिकया देश्या—

दर्शनान्तरकान्तारकण्टकद्रुमकोटरात् ।
किरातः कोऽपि कूटस्थो दत्ते मन्त्रामृतं मधुः ।।

इति संविदुल्लासस्थित्या व्रतोपवासाद्युपद्रवबहुलोपायप्रयोजकानन्त-शास्त्रान्तरसङ्कटेऽपि प्रपञ्चे श्रीमदनुत्तरक्रमप्रणयनप्रवीणस्य परमेश्वरस्य परम-कारुण्यमात्रोपपादितेयमास्माकीना यामली सिद्धिः, या श्रीकुलगह्वरादिषु—

यत्तदक्षरमव्यक्तं प्रियाकण्ठेऽप्यवस्थितम् ।
ध्वनिरूपमनिच्छं तु ध्यानधारणवर्जितम् ।
तत्र चित्तं विधायैवं वशयेद् युगपज्जगत् ।

इत्यादिना भोगमोक्षसामरस्यात्मकतयोपपाद्यत इत्यासूत्र्यते। तदुक्तं श्री-तन्त्रालोके—

अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः ।
घटकुम्भवेदकार्थाः शब्दा.....।। इति।

यह संसारस्वरूप सुख (जागतिक सुखातिशय) कितना मादक और विस्मय-गर्भित आनन्द प्रदान करने वाला है। आश्चर्य तो यह है कि यही अनन्त सुखों से गर्भित जगत् सांसारिक (बाह्यमुखी) मनुष्यों के लिये जन्म-मरणादि चक्र के रूप में अत्यधिक दुःखप्रद है। इस प्रकार इसके त्याज्य एवं घृणास्पद रूप में निश्चित किये जाने पर भी प्राणियों द्वारा इसका मोक्षवत् स्वाद ग्रहण किया जाता है।

स्तोत्रावली की दृष्टि—स्तोत्रावली में भी कहा गया है—

दुःखान्यपि सुखायन्ते विषमप्यमृतायते।
मोक्षायते च संसारो यत्र मार्गः स शाङ्करः।।

अर्थात् जहाँ शैवी मार्ग है, वहाँ तो दुःख भी सुख के रूप में तथा विष भी अमृत के रूप में रूपान्तरित हो जाते हैं। उस शांकर मार्ग में तो (बन्धनस्वरूप यह) जगत् भी मोक्ष के रूप में रूपान्तरित हो जाता है।

यह कितने आश्चर्य की बात है कि मोक्षलक्षणात्मक सर्वजनानुसन्धेय एवं परमात्मा की अनुकम्पामात्र से सौभाग्य सभी व्यक्तियों को सरलता से प्राप्य है।

त्रिंशिकाशास्त्र में भी इसी पुरुषार्थ या अध्यवसाय से रहित सुखाप्तिरूप दिव्य भोगों की प्राप्ति का उल्लेख किया गया है—

अदृष्टमण्डलोऽप्येतत् तिलाद्याहुविवर्जितम्।

इसी प्रसंग में महावनमुनि ने भी कहा है—

अलिपिशित पुरन्ध्री भोगपर्याकुलोऽहं,
बहुविधकुलयोगारम्भसम्भावितोऽहम् ।

पशुजनविमुखोऽहं भैरवीसंश्रितोऽहं,
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम्।।

उक्त गाथा में जो 'त्रुटितातंक' (भयविमुक्त) शब्द का प्रयोग किया गया है, वह इसीलिये किया गया है; क्योंकि भोग-मोक्षसामरस्य में जो सुख है, वह भी शिवात्मक है और जो दु:ख है, वह भी शिवात्मक है; अत: किसी भी स्थिति में कहीं दु:ख है ही नहीं।

यहाँ ध्यान के कृच्छ्रसाधन एवं जप के कठोर अध्यवसाय के बिना तथा शास्त्र-विधियों के पालन के बिना भी भगवान् शिव के अनुग्रह की प्राप्ति हो जाया करती है। उत्पलदेवाचार्य इसकी पुष्टि करते हैं।

उत्पलदेवाचार्य शिवस्तोत्रावली में कहते हैं कि जिसको बिना ध्यान के तथा बिना जप के, विधिरहित रूप से मात्र ईश्वरानुग्रह के शिव का आभास (प्रकाश) प्राप्त हो, उस भक्तिशिरोमणि की हम स्तुति करते हैं।

न ध्यायतो न जपत: स्याद् यस्याविधिपूर्वकम्।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम्।।

यहाँ प्राणधारण (पूरक, कुम्भक प्राणायाम) आदि के उपरोध (बाधा) से पृथक् (व्यतिरेक) भगवान् शिव के साथ नित्य योग की प्राप्ति होती है और साथ ही प्रकाशात्मा भगवान् शिव के साथ विमर्शात्मक सम्बन्ध भी स्थापित होता है। इस शैव मार्ग में योगियों को जो यामली सिद्धि प्राप्त होती है, वह स्वस्वभाव चमत्काराकारिता स्फुरत्ता से युक्त है और वह यामली सिद्धि कभी भी वेद्य-वेदकद्वय स्वरूप वाली सृष्टि को अतिक्रान्त नहीं करती; क्योंकि कहा गया है—

यस्योन्मेषनिमेषाभ्यां जगत: प्रलयोदयौ।
तदन्त:कालयोगेन सोमसूर्यौ प्रकीर्तितौ।
ज्ञानक्रियात्मनो: शम्भुमरीच्योर्मेलनात्मकम्।।

सारांश यह कि अनेक आम्नायों में प्रतिपादित प्रक्रियाओं के द्वारा जगत् के संकोच-विकास (प्रलय-सृष्टि) रूप ज्ञत्व-कर्तृत्व के अपर पर्याय प्रकाश एवं विमर्श के सामरस्यात्मक यामलोल्लासस्वभाव का सभी आम्नायों में प्रतिपादन किया गया है।

आचार्य अभिनवगुप्त कहते हैं—तत्र ज्ञाता नामोन्मेषनिमेषलक्षणेन संकोचविकासात्मना ज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसार एव।

इस यामलभाव की केवल एक ही कोटि है और वह परभैरव संवित्स्वातन्त्र्यपर्यन्त स्थित है। अन्य कोटि अत्यन्त जड़ घटादि प्रकाशपर्यन्त स्फुरित होती है। कारण यह है कि स्वात्मस्वरूप परमात्मा का उदय एवं विश्रमण स्वभाव है।

ऐतरेयोपनिषद् में कहा गया है—अ इति ब्रह्म तत्रागतमहम्। इसके अनुसार रुद्र-

यामल शिव-शक्ति मेलाप-स्वरूप और नित्योदितोद्योगस्वभाव है। त्रिंशिकाशास्त्र में भी कहा गया है—इत्येतद् रुद्रयामलम्।

इस गाथा में 'आतंक' शब्द शंकानिबन्धन के अर्थ में प्रयुक्त किया गया है। शंका क्या है? शंका वह है, जिसके द्वारा सकृद्विभातस्वभाव, स्वात्मसंवित् एवं एकरस परा सत्ता का आस्वादन प्रत्यूहों (विघ्नों) के साथ किया जाता है। आस्वाद में विप्रतिपत्ति का अनुप्राणन होने के कारण ही इसे शंका या आतंक (संशय) कहा गया है। उस आतंक का यह कलंक, जो कि स्वच्छ स्वात्मा में भी मालिन्यात्मक शंका के रूप में प्रवेश कर जाती है। वह इत्याकारक 'आतंक' इस शैवी मार्ग में नष्ट हो जाता है। वह स्ववासनापर्यन्त विनष्ट हो जाता है। तब यह प्रतिपादित सिद्धि भी उस साधक को प्राप्त हो जाती है। इसी दृष्टि से आचार्य अभिनवगुप्तपाद ने कहा है—न त्वत्र विद्याव्रतादि किञ्चित् सहकारिभावेनोपयोगि। केवलं परीक्षणातङ्कत्वमत्रोपयोगि। कहा भी कहा है—

दर्शनान्तर-कान्तार-कण्टकद्रुम-कोटरात् ।
किरातः कोऽपि कूटस्थो दत्ते मन्त्रामृतं मधुः।।

संविदुल्लास में कहा गया है—व्रत, उपवास आदि उपद्रवबहुल उपायों के प्रयोजक अनन्त शास्त्रों में मतभेद होने पर भी तो अनुत्तर क्रम प्रणयन में पटु परमात्मा की केवल परम करुणामात्र को ही यामली सिद्धि का कारण माना जाना चाहिये।

श्रीकुलगह्वर में भी इसी स्थापना की पुष्टि की गई है—

यत् तदक्षरमव्यक्तं प्रियाकण्ठेऽप्यवस्थितम्।
ध्वनिरूपमनिच्छं तु ध्यानधारणवर्जितम्।
तत्र चित्तं विधायैवं वशयेद् युगपज्जगत्।।

इस प्रकार यहाँ पर भी भोग-मोक्षसामरस्य का प्रतिपादन किया गया है।

तन्त्रालोक में भी कहा गया है—अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः। घटकुम्भवेदकार्थाः शब्दा इति। अर्थात् शिव-शासन की भूमि में सुख-दुःख, बन्ध-मोक्ष एवं चेतन-जड़ में उसी प्रकार कोई भेद नहीं है, जिस प्रकार घट एवं कुम्भ में। ये दोनों ही शब्द एक ही अर्थ के द्योतक होने से अभिन्न हैं।[१]

अमृतस्वभाव भाव की प्राप्ति का फल

नन्वस्मिन्नकुतोभयसंविदाह्लादोभयस्वभावास्वादवपुषि पुरुषार्थे तदुत्कर्षानुकूलया कालक्रमोपकल्पनीयया कयाचिदत्यन्ततीव्रयोपास्त्या भवितव्यम्। सा चास्मदादेः सद्यो न सम्पद्यत इति श्रूयमाणतामात्रसौभाग्यमेतदर्थोन्मीलनम्, न पुनः स्वहृदयानुभूतिपर्यवसायीत्याशङ्कां क्षपयितुमाह—

१. परिमल

खणमेत्तफंसिएण वि अमअसहावेण णेण भावेण।
सव्वोत्तिण्णो सव्वो सव्वइरं लहइ सव्वसोहग्गं ॥६६॥

(क्षणमात्रस्पृष्टेनाप्यमृतस्वभावेनानेन भावेन।
सर्वोत्तीर्णः सर्वः सर्वचिरं लभते सर्वसौभाग्यम्।।)

क्षणमात्र के लिये भी इस अमृतस्वभावस्वरूप भाव का संस्पर्श होने पर (योगी) सर्वोत्तीर्ण हो जाता है (अर्थात् समस्त बन्धनों से मुक्त हो जाता है) और समस्त सौभाग्य सदा के लिये प्राप्त कर लेता है।।६६।।

योऽयमन्वादिश्यमानो भावः स्वहृदयस्फुरत्तापरपर्याया महासत्ता स खलु—

यस्मिन् काले तु गुरुणा निर्विकल्पं प्रभाषितम्।
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम्।।

इति श्रीरत्नमालामर्यादया गुरुकटाक्षपातलक्षणात् काललेशविशेषात्मनः क्षणादेव सृष्टानुप्रविष्टो भवन्नप्यमृतस्वभावचिदाह्लादद्वितयसामरस्याकारसार-स्वरूपतया जीवन्मुक्त्यात्मा महोपभोगो भवति। अथवा अत एव हेतोरमृतस्वभावो नित्यास्वाद्यतानैयत्ययोगात्। 'अस्योच्चारे कृते' इत्यारभ्य 'फलं यद् वा समीहितम्' इत्यन्तं श्रीत्रिंशिकाशास्त्रस्थित्या मुहूर्तप्रहरवासरादिकालक्रमोत्कर्षकक्ष्यानुवृत्तेरुपर्यु-परिपरामर्शानुस्यूतिदर्शितदार्ढ्ययोगश्च सम्पद्यत इत्यावृत्त्या योजना। तादृशा च भावेन हेतुभूतेन सर्वस्तिर्यक्त्वमनुष्यत्वजीवत्वामृतत्वजडत्वाजडत्वादितारतम्य-शून्यः प्रमातृवर्गः सर्वस्मात्—

समनान्तं पाशजालमुन्मन्यन्ते परः शिवः।

इति स्थित्या विश्वविलासलक्षणाद् बन्धहेतोरुत्तीर्णः शुद्धचैतन्यस्वभावो भवन् सर्वचिरम्

ब्रह्मायुषो दशगुणं विष्णोरायुः परं स्मृतम्।
सहस्रगुणितं तस्माद् रुद्रस्यायुः परं किल।।
तस्माल्लक्षगुणं प्रोक्तमीश्वरस्यायुरुत्तमम्।
तस्मात् सदाशिवस्यायुः प्रोक्तं कोटिगुणं बुधैः।
समुद्रगुणितं तस्माच्छिवयोर्देहधारणम्।

इति श्रीलघुबृंहणीमर्यादोपपादितब्रह्मविष्ण्वादिपुरुषायुषप्रवृत्तिपरिपाटी-रूपकालक्रमोत्खण्डनेन यावत्कालतत्त्वं सर्वं पाषाणादिजडपदार्थस्वभावापत्ति-पर्यन्तमिदन्तासाम्राज्यं परमशिवीभावरूपचैतन्योत्कर्षकाष्ठावधिकमहन्ता-सम्पत्संभोगसर्वस्वं चेति सम्भूय विश्वतदुत्तीर्णत्वसामरस्यास्वादसामानाधिकरण्य-रूपं सौभाग्यमन्तःकरणहरणप्रावीण्यलक्षणं श्लाघ्यत्वातिशं लभते स्वपरिस्पन्दा-

त्मकतया प्राप्नोति। अयं भावः—श्रीमद्देशिकनाथकटाक्षपातसमसमयमेव पुंसां स्वहृदयसंवादसौन्दर्यशालिनो जीवन्मोक्षलक्षणस्य पुरुषार्थस्योपलम्भ इत्यत्र न काचिद् विप्रतिपत्तिः। यदुक्तं श्रीत्रिंशिकाशास्त्रे—'सद्यः कौलिकसिद्धिदम्, सद्यो योगविमोक्षदम्' इति च। यथोक्तमाचार्याभिनवगुप्तपादैः—'एतद् यो लभते स लाभकाल एव न पशुः' इति। तादृशस्यैव च भावस्यान्तः परामर्शः क्रिया-समभिहारे तत्तदणिमाद्यैश्वर्यस्वभावो बहिर्विभूतिपरिस्पन्दोऽनुभूयते। तदुक्तं तत्रैव—

एतदभ्यस्यतः सिद्धिः सर्वज्ञत्वमवाप्यते ।। इति।

यद् व्याख्यातमभिनवगुप्तपादैः—'अभ्यासेन विनापि जीवन्मुक्ता परा कौलिकी सिद्धिः' इति। क्षणमात्रेति। क्षणिक एव हि परामर्शः—

सकृज्ज्ञाते सुवर्णे मा भावनाकरणं व्रजेत् ।

इति श्रीशिवदृष्टिदृष्ट्या बहिष्ठेष्वपि पदार्थेष्वसंशयमर्थक्रियामर्थं प्रयोजयति। किमुत स्वस्वभावात्मनि परमेश्वराख्ये भाव इत्यर्थः। यदुक्तं तत्रैव—

एकवारं प्रमाणेन शास्त्राद् वा गुरुवाक्यतः ।
ज्ञाते शिवत्वे तत्रस्थप्रतिपत्त्या दृढ़ात्मना ।।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा । इति।

अत्र पृथगनेकार्थशालिनां सर्वशब्दानामर्थप्रपञ्चप्रस्तावो विस्तारायेत्यलं ग्रन्थगौरवेण। यत् संभूय सर्वसाम्यस्वभावा महार्थसिद्धान्तोपनिषदुन्मील्यते। यदुक्तमागमे—

समता सर्वभावानां वृत्तीनां चैव सर्वशः ।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः ।
भूमिकानां च सर्वासामोवल्लीनां च सर्वशः ।
समता सर्वदेवानां वर्णानां चैव सर्वशः ।। इति।

श्रीरत्नमाला में कहा गया है कि जिस भी काल में गुरु निर्विकल्प तत्त्व का उपदेश देते हैं, उसी काल में उनकी शक्तिपातजन्य अनुकम्पा और उनके लोकोत्तर आत्मबल द्वारा साधक मुक्त हो जाता है। वह अमृतस्वभाव चिदाह्लाद और सामरस्याकार जीवन्मुक्ति के महोपभोग (अप्रतिम परमाह्लाद) का आस्वादन करता है।

श्रीत्रिंशकशास्त्र में 'अस्योच्चारे कृते' से लेकर 'फलं यद् वा समीहितम्' पर्यन्त कथनों में भी इसी तथ्य की पुष्टि की गई है। इसमें कहा गया है कि गुरुकृपा-प्राप्त साधक मुहूर्त, प्रहर, वासर आदि के कालक्रम से अपनी साधना एवं सिद्धि की कक्षा में उत्तरोत्तर सिद्धि-उत्कर्ष के व्योम में आरोहण करता हुआ आत्मपरामर्श की अनुस्यूति

में दार्ढ्य योग (दृढ़ता) प्राप्त करता जाता है। इस दार्ढ्य योग के भाववश वह तिर्यक् भाव, मनुष्यत्व, जीवत्व, अमृतत्त्व, जडत्व, अजडत्व आदि के तारतम्य से मुक्त होकर परप्रमाता परमशिव बन जाता है। स्पष्ट है कि 'समना' तक पाशजाल बिछा हुआ है और उन्मना के अन्त में परमशिव का अवस्थान है—

समनान्तं पाशजालमुन्मन्यन्ते पर: शिव:।

आचार्य महेश्वरानन्द पूर्वपक्ष की ओर से यह शंका उठाते हैं कि जब तक साधना में कठोर अध्यवसाय, तीव्र उपासनापूर्वक दीर्घकाल तक अभ्यास एवं तप नहीं किया जाता, तब तक सिद्धि नहीं मिलती; फिर इन उपायों एवं कृच्छ्र अभ्यासों के बिना भला भगवदनुग्रह ही कैसे प्राप्त हो जाएगा एवं उसके द्वारा सरलतापूर्वक यामली सिद्धि (भोग-मोक्षसामरस्यात्मक सिद्धि) ही कैसे प्राप्त हो जाएगी। उत्तर पक्ष में इसी शंका के निराकरणार्थ उन्होंने अगली गाथा में कहा है—

खणमेत्तफंसिएण वि अमअसहावेण णेण भावेण।
सव्वोत्तिण्णो सत्वो सत्वइरं लहइ सव्वसोहग्गं।।

गुरुकृपा-प्राप्त योगी विश्वविलासात्मक बन्धनों से उत्तीर्ण होकर एवं शुद्धचैतन्यस्वभाव होकर ब्रह्मायु, विष्णु की आयु, रुद्रायु, ईश्वरायु, सदाशिवायु को अतिक्रान्त करता हुआ परमकालातीत परशिवत्व को प्राप्त करता है। इन पूर्वकथित देवों की आयु का क्रम इस प्रकार है—

ब्रह्मायुषो दशगुणं विष्णोरायु: परं स्मृतम्।
सहस्रगुणितं तस्माद् रुद्रस्यायु: परं किल।।
तस्माल्लक्षगुणं प्रोक्तमीश्वरस्यायुरुत्तमम्।।
तस्मात् सदाशिवस्यायु: प्रोक्तं कोटिगुणं बुधै:।
समुद्रगुणितं तस्माच्छिवयोर्देहधारणम्।।

श्रीमान् देशिकनाथ के कृपाकटाक्ष से उसी समय शिष्य स्वहृदयसंवादात्मक सौन्दर्य से मण्डित होकर जीवन्मुक्तिलक्षणात्मक पुरुषार्थ प्राप्त कर लेता है। इसमें कोई विप्रतिपत्ति नहीं है—श्रीमद्देशिकनाथकटाक्षपातसमसमयमेव पुंसां स्वहृदयसंवादसौन्दर्यशालिनो जीवनमोक्षलक्षणस्य पुरुषार्थस्योपलम्भ इत्यत्र न काचिद् विप्रतिपत्ति:।[१]

साधक 'परमशिवीभावरूपचैतन्योत्कर्षकाष्ठावधिकमहन्तासम्पत्संभोगसर्वस्वं' से लेकर 'विश्वमुत्तीर्णत्वसामरस्यास्वादसामानाधिकरण्यरूपसौभाग्यमन्त:करणप्रावीण्यलक्षणा से युक्त स्वपरिस्पन्दात्मक' सिद्धोत्कर्ष के अभ्रंलिह शिखर तक पहुँच जाता है।

त्रिंशिकाशास्त्र में शैवशासनोक्त सिद्धि को सद्य:सिद्ध कहा गया है। 'सद्य: लौकिक-

१. परिमल

सिद्धिदम्' एवं 'सद्यो योगविमोक्षदम्' कहकर सिद्धि की कालनिरपेक्षता प्रतिपादित की गई है।

आचार्य अभिनवगुप्त कहते हैं—अभ्यासेन विनापि जीवन्मुक्ता परा कौलिकी सिद्धिः। अर्थात् विना किसी कृच्छ्र अभ्यास के भी जीवन्मुक्तिसंज्ञक परा कौलिकी सिद्धि प्राप्त हो जाती है। क्षणिक परामर्श भी यह कृतकृत्यता प्रदान कर देता है।

शिवदृष्टि में सोमानन्द कहते हैं—

सकृज्जाते सुवर्णे माभावनाकरणं व्रजेत्।

कहा गया है—

एकवारं प्रमाणेन शास्त्राद् वा गुरुवाक्यतः।
ज्ञाते शिवत्वे तत्रस्थप्रतिपत्त्या दृढ़ात्मना।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा।।

इस शैवशासन में प्रतिपादित 'महार्थ सिद्धान्त उपनिषद्' सर्वसाम्यस्वभाव के रूप में उन्मीलित हुआ है।[१]

आगम में इसी साम्यभाव का प्रतिपादन करते हुये कहा गया है कि यह समत्व भाव सभी भावों एवं वृत्तियों में, सभी समस्त दृष्टियों एवं द्रव्यों में, सभी भूमिकाओं, देवताओं एवं वर्णों आदि सभी में होनी चाहिये—

समता सर्वभावानां वृत्तीनां चैव सर्वशः।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः।।
भूमिकानां च सर्वासामोवल्लीनां च सर्वशः।
समता सर्वदेवानां वर्णानां चैव सर्वशः।।

यह सर्वसाम्यस्वभाव ही महार्थसिद्धान्त का रहस्यपक्ष है।

गुरु के शक्तिपात की महिमा

नन्वेवमनायाससाध्यमर्थं प्रति प्रमातृणां सौलभ्याविशेषात् कथं मुक्तामुक्त-व्यवस्था द्वैविध्यव्यवहार इत्याशङ्क्याह—

गूढादो गूढअरो होइ फुडादो वि फुडअरो एसो।
देसिअकडक्खपादे पक्खो पुढमो ण होइ धण्णाणं ॥६७॥

(गूढाद् गूढतरो भवति स्फुटादपि स्फुटतर एषः।
देशिककटाक्षपाते पक्षः प्रथमो न भवति धन्यानाम्।।)

सौभाग्यशाली साधकों का गुरु के शक्तिपातमात्र से गूढ़ से गूढ़तर एवं स्फुट से

१. परिमल

स्फुटतर सारे प्राथमिक उभयात्मक व्यवहार समाप्त हो जाते हैं।।६७।।

एष प्राकरणिकतया परामृश्यमानोऽर्थो यः स्थूलसूक्ष्मप्रकटाप्रकाशव्यक्ताव्यक्तक्षराक्षरेति विष्णुपुराणप्रक्रियया प्राकट्यमप्राकट्यं चेत्यात्मन्यवस्थाद्वयमुद्भावयति। तत्र च यदगूढं स्तम्भकुभादि व्यवहारं प्रति। गूढं वेदान्तादिनिर्णीतमर्थतत्त्वम्। ततोऽप्ययं गूढतरोऽत्यन्तगुह्यो भवति। यदुक्तं श्रीत्रिंशिकाशास्त्रे—

एतद् गुह्यं महागुह्यं कथयस्व मम प्रभो । इति।

यश्चास्फुटमन्तरिक्षप्रसूनादिं प्रति स्फुटः स्तम्भकुम्भादिः प्रकाशमानः प्रमेयप्रपञ्चः, ततोऽपि स्फुटतरः प्रकृष्टप्राकट्यो भवति। तच्च 'सो कस्स फुटो न होइ कुलणाहो' इत्यत्र वितव्य व्याख्यातम्। एवमुभयस्वभावतायामस्य स्वातन्त्र्यव्यतिरेकेण नान्यः कश्चिदुपाधिरुपपद्यते। कथं तर्हि मुक्तामुक्तव्यवस्थेति चेत्? विषयविभागादिति ब्रूमः। तथाहि—देशिकस्य कुलाचार्यस्य कटाक्षपाते शक्तिपातविनाभूते संभवति धन्यानामपश्चिमजन्मनां केषाञ्चित् प्रमातृणां प्रथमः पक्षः पूर्वार्धप्रस्तुतो गूढाद् गूढतर इत्येवंरूपः कल्पो न भवति, किं तर्हि, स्फुटात् स्फुटतर इत्येवमाकारः।

दीयते शिवसद्भावः क्षप्यते पाशसंचयः ।

इति नीत्या दानक्षपणलक्षणदीक्षाविनाभूतो द्वितीय एव तेषां पक्षः सम्पद्यते। ततश्च देशिककटाक्षपातधन्यानां पुंसां परमशिवीभावलक्षणो मोक्षः, तदन्येषां पाशवावेशस्वभावो बन्ध इति व्यवस्थेति तात्पर्यार्थः। अत्र देशो देशना स्वात्मप्रत्यभिज्ञापनारूपरहस्यार्थोपदेशनात्मा स्वभावोऽस्यास्तीति व्युत्पत्त्या गुरुनाथशरीरानुप्रविष्टः परमेश्वर एव कारुण्यादवच्छिन्नप्रमातृरूपं शिष्यमुत्तारयतीत्युद्भाव्यते। यदुक्तमागमे—

कुलाचार्यमधिष्ठाय देवो दीक्षयिता शिवः । इति।

यच्चोक्तं श्रीतन्त्रालोके—

गुरुहृदयनिविष्टः शङ्करोऽनुग्रहीता । इति।

एतेन—

दीक्षया मुच्यते जन्तुः प्रातिभेन तथा प्रिये!।
गुर्वायत्ता तु सा दीक्षा बद्धबन्धनमोक्षणे।।
प्रतिभा स्वस्वभावस्तु केवलीभावसिद्धिदः।।

इति श्रीकिरणप्रक्रियया पुंसां स्वप्रतिभामात्रनिष्पद्यमानमोक्षानुभावानामपि पर्यन्ततः किञ्चिद्देशिकनाथानुग्रहावश्यम्भाव एवेत्युक्तं भवति। येन परमेश्वर-

स्वातन्त्र्याधीनविजृम्भिते विश्वस्मिन्नेतदाज्ञामन्तरेण तेषां तादृक् प्रतिभैव न संपद्यते। परमेश्वरानुप्रविष्टशरीरस्यैव च भगवतो देशिकनाथस्य दीक्षाद्यलौकिकक्रियोपक्षेपक्षमत्वमिति। तस्य च कटाक्षपाते सतीत्यनेन केवलं चाक्षुष्येव दीक्षाख्यायते। यावदाणवशाक्तशाम्भवाख्यप्रकारत्रयानुप्रविष्टास्तत्तद्देशकालस्वभावानुगुण्याद्यन्यतमौचित्यशालिनः सर्वेऽपि तत्प्रकाराः परामृश्यन्ते। यतः कटाक्षो नाम गुरोरनुग्राह्यं प्रत्यनुवेशयितुमिष्टा स्वहृदयसंविन्मयी शाम्भव्याद्यशेषदीक्षानुस्यूता दृक्शक्तिरित्याख्यायते। यदाहुः—

सा च सर्वाध्वसंपूर्णमात्रसंविदभेदिना।
गुरुणाऽनुग्रहधिया शिष्ये यदवलोकनम्।। इति।

